# THE GAṆḌAVYŪHA SŪTRA

## CRITICALLY EDITED

BY

DAISETZ TEITARO SUZUKI

*Doctor of Literature*

AND

HOKEI IDZUMI

*Professor of the Sanskrit Language*
*at Otani University, Kyoto*

New Revised Edition

THE SOCIETY FOR THE PUBLICATION OF SACRED BOOKS
OF THE WORLD

Gekkoin, Gokokuji,

Otsuka Sakashita-machi, Bunkyo-ku,

ToKyo

# NOTE

In this edition of the *Gandavyūha Sūtra* the following MSS have been used:

1. The palm-leaf MS (to be designated in future references, (A) in the Library of the Royal Asiatic Society, London, a rotograph copy of which was obtained by Prof. D. T. Suzuki in 1930.

2-3. The two paper MSS (C 1 and C 2) in the Library of Cambridge University, Cambridge, England, a rotograph copy of each of which was obtained by Prof. D. T. Suzuki in 1930.

4. A paper MS (P) belonging to the Bibliothèque Nationale, Paris, a photograph copy of which Prof. D. T. Suzuki took during his stay in Paris in 1908.

5. A paper MS (T) of the Library of fhe Tokyo Imperial University.

6. A paper MS (K) of the Library of the Kyoto Imperial Universi y.

The last two MSS brought over to Japan were hand-copied and collated by Prof. H. Idzumi in 1907-14. The MS thus prepared by him was the basis of the mimeograph copies which were made by Prof. Shinryu Susa at the request of Prof. D. T. Suzuki in 1929, and about twenty of these copies were distributed among their friends. For this, thanks are due to the compiler and owner of the MS Prof. H. Idzumi.

---

The idea of editing the *Gandavyūha Sūtra* has been for a long time in my mind, while in Europe 1908–9, I took a photographic copy of the MS in the Bibliothèque Nationale and had communication on the subject with the late Dr. Kaikyoku Watanabe who had been staying in Strassburg. He was willing to let me have his copy of the sutra which he had carefully made by collating all the MSS he had then personally had access to. But as I was not quite yet ready for the work, I did not avail myself at the time of his kind offer. Back in Japan, both of us were kept busy by so many other things which demanded immediate attention. Besides I had no funds to use for a task demanding so much help in various ways. All the time, however, my mind was on the *Gandavyūha*.

The cultural loss national and individual sustained by the earthquake and the great fire that followed in 1923 was beyond calculation. With many other valuable MSS in the possession of Dr. Watanabe, the *Gandavyūha* MS to which reference has been made was reduced to ashes. The destruction of this kind so extensively and irrevocably suffered by scholars and art-lovers made me all the more strongly desire at an early date to undertake the editing of the important Sanskrit texts of Mahayana Buddhism.

I moved to Kyoto in 1921 to take a position at the Ōtani Buddhist College (Ōtani Daigaku). This was about the time when the late Dr. Bunyu Nanjo was preparing his *Lankāvatāra* edition in Sanskrit. With its completion I undertook an English translation of it, which appeared in 1932 and its *Studies* in 1930. While working on the *Lankavatāra*, I found out that Prof. Idzumi also had his copy of the *Gandavyūha*

which he had made by collating two MSS belonging to the Tokyo and the Kyoto Imperial University Library. The time for carrying out my long-cherished plan was approaching. I availed myself of the first good opportunity of obtaining rotograph copies of the MSS kept in England. There are thus now altogether six copies to be used for our work.

This editing of the *Gaṇḍavyūha* was, however, more than I could undertake by myself alone not only from the point of scholarship but from the point of time to be spent on it. My interest in the Sanskrit Buddhist texts is first of all in their religious and philosophical significance, and that in matters of textual criticism and linguistic study is secondary. The scholar who can supply me with all the necessary help and information in this respect was found in the person of Prof. Hōkei Idzumi. He was willing to enlist his time and scholarship in this great task of editing the *Gaṇḍavyūha*. What success we have achieved here is to be ascribed to my *kalyanamitra*.

The present edition is mainly based on the palm-leaf MS of the Library of the Royal Asiatic Society of London, which the late Dr. Watanabe too considered the most indispensable one for our purpose. When the entire text is printed in the next two parts, a volume devoted to a list of variant readings in the six MSS in our possession will be published. The plan is also on foot to have a complete index of various kinds which is absolutely needed for a thorough understanding of the sutra in its varied significations.

An English translation of this sutra which marks a culmination in the development of Mahayana thought has been in contemplation by me for many years. When the text in the modern Devanagari type is made generally accessible, the translator's work will be made so much the easier, and the reader will also be able to refer whenever necessary to the original text.

I have in concluding this prefatory note to say a word of sincere appreciation for Prof. Hokei Idzumi and Mr. Susumu Hoshinobori who gave up so much time and labour in copying, type-setting, proof-reading, etc., which belong to the drudgery of printing, especially this type of book—quite an unusual undertaking in Japan. I must also not forget to express my thankful feeling towards the authorities of the Ōtani Daigaku in their permitting us to use the printing plant including the Devanagari type, etc., and also defraying a part of the expenses incident to the use of the prniting outfits.

That this edition of the *Gaṇḍavyūha Sūtra* with all its imperfections is now placed before scholars and readers who are engaged in the study of Mahayana Buddhism, enabling them to probe into the secrets of the religious consciousness of the Oriental peoples, is due to the protecting power of all the Buddhas and Bodhisattvas, who are eonstantly wacthing over our work and guiding it towards the universal welfare and enlightenment of all beings, and for which we are all most devoutly grateful.

DAISETZ TEITARO SUZUKI

Kyoto, October 1934

While going over the printed text the editors found many imperfections and provisionarily entered whatever corrections that were to be made on the lower part of the page. The lines needing correction are marked in the body of the text.

A full recovery of the printing facilities in Japan requires some years yet to come, but as we observe an increasing demand for the *Gaṇḍavyūha* text, we have decided to produce a photographic reprint of the corrected text as we have so far prepared for our own use.

We hope the corrections are readily identifiable.

As reagrds a volume of variant readings, we regret that it is not yet quite ready for press.

We have a Sanskrit-Chinese index already prepared for the *Gaṇḍavyūha* text, which however requiring further elaboration we withhold it from publication for some time yet.

It is with great grief to report the death of Professor Hokei Idzumi which took place in 1947. The co-editor takes this opportunity to express his appreciation of all that the late Sanskrit scholar did for the publication of the present text.

Daisetz T. Suzuki

Kamakura, May 1949

विमतिविचिकित्सासमुच्छिन्नबुद्धज्ञानसमुद्राधिमुक्तिपथावतीर्णैः । लोकेन्द्रैश्च पूर्वजिनाधिकारैः सर्वजगद्धितसुखप्रतिपन्नैरनधीष्टकल्याणमित्रैः परसत्त्वरक्षाप्रतिपन्नैः लोकविशेषवतिज्ञानसुखावतीर्णैः सर्वसत्त्वापरित्यागचित्तैर्बुद्धशासनगोचरनिर्यातैस्तथागतशासनरक्षाप्रतिपन्नैर्बुद्धवंशसंधारणप्रणिधिनिर्जातैस्तथागतकुलगोत्रसंभवाभिमुखैः सर्वज्ञताज्ञानाभिलापिभिः ॥

अथ खलु तेषां बोधिसत्त्वानां सपरिवाराणां तेषां च श्रावकमहर्द्धिकानां तेषां च लोकेन्द्राणां सपरिवाराणामेतदभवत् । न शक्यं सदेवकेनापि लोकेन तथागतविषयस्तथागतज्ञानगोचरं तथागताधिष्ठानं तथागतबलं तथागतवैशारद्यं तथागतसमाधिस्तथागतविहारस्तथागताधिपत्यं तथागतकायस्तथागतज्ञानमवगन्तुं वावगाहितुं वाधिमोक्तुं वा प्रज्ञातुं वा विज्ञातुं वा विचारयितुं वा विभावयितुं वा विभाजितुं वा प्रभावयितुं वा परसत्त्वसंतानेषु वा प्रतिष्ठापयितुम् ॥ अन्यत्र तथागतपूर्वप्रणिधानेन पूर्वबुद्धसुकृतकुशलमूलतया कल्याणमित्रपरिग्रहेण श्रद्धानयनज्ञानपरिशुद्ध्या उदाराधिमुक्त्यवभासप्रतिलम्भेन बोधिसत्त्वाध्याशयपरिशुद्ध्या अध्याशयसर्वज्ञताप्रणिधानप्रस्थानेन ॥ अप्येव नाम भगवानस्माकं यथाशयानां बोधिसत्त्वानां सर्वेषां च सत्त्वानामाशयविमात्रतया अधिमुक्तिनानात्वतया प्रतिबोधनानात्वतया वचनसंकेतनानात्वप्राप्तानां नानाधिपतेयभूमिप्रतिष्ठितानां नानेन्द्रियविशुद्धानां नानाशयप्रयोगानां नानाचेतनाविषयाणां नानाधर्मनिर्देशदिगभिमुखानां पूर्वसर्वज्ञताप्रस्थानं च संदर्शयेत् । पूर्वबोधिसत्त्वप्रणिधानाभिनिर्हारं च संदर्शयेत् । पूर्वबोधिसत्त्वपारमितामण्डलविशुद्धिं च संदर्शयेत् । पूर्वबोधिसत्त्वभूम्याक्रमणविकुर्वितं च संदर्शयेत् । पूर्वबोधिसत्त्वचर्यामण्डलाभिनिर्हारपरिपूरिं च संदर्शयेत् । पूर्वबोधिसत्त्वयानाभिनिर्हारव्यूहावभासं च संदर्शयेत् । पूर्वबोधिसत्त्वमार्गव्यूहपरिशुद्धिं च संदर्शयेत् । पूर्वबोधिसत्त्वनिर्याणनयसागराभिनिर्हारव्यूहानपि संदर्शयेत् । पूर्वबोधिसत्त्वसमुदागमविकुर्वितसागरव्यूहानपि संदर्शयेत् । बोधिसत्त्वपूर्वयोगसमुद्रानपि संदर्शयेत् ।

तथागताधिष्ठानेन तथागतविकुर्वितेन तथागतानुभावेन

नानातथागतगुणनिःश्रितानां

वर्षमभिप्रवर्षन् दिव्यरत्नछत्रमेघानभिनिर्हरन् विचित्रनानारङ्गसूक्ष्मदिव्यवस्त्रमेघवर्षमभिप्रवर्षन् दिव्यरत्नध्वजपताकामेघान् गगनतले ऽधितिष्ठन् रुचिरैः सर्वरत्नमेघव्यूहैर्गगनतलं स्फरन् येन भगवांस्तेनोपसंक्रम्य सार्धं परिवारेण भगवन्तं नमस्कृत्य पूर्वां दिशमुपनिश्रित्य समन्तव्यूहमणिरत्नजालसंछन्नानि कूटागाराणि दिक्प्रभासमणिराजपद्मगर्भाणि च सिंहासनान्यभिनिर्माय न्यषीदत्पर्यङ्कमाभुज्य चिन्ताराजमणिरत्नजालालंकारसंछन्नानि बोधिसत्त्वशरीराण्यधिष्ठाय ॥

दक्षिणायां दिश्यनभिलाप्यबुद्धक्षेत्रपरमाणुरजःसमानां लोकधातुसमुद्राणां परेण वज्रसागरगर्भाया लोकधातोः समन्तावभासश्रीगर्भराजस्य तथागतस्य बुद्धक्षेत्राद् दुर्योधनवीर्यवेगराजो नाम बोधिसत्त्वो महासत्त्वः सार्धमनभिलाप्यबुद्धक्षेत्रपरमाणुरजःसमैर्बोधिसत्त्वैस्तेन च भगवतानुज्ञातस्ततः पर्षन्मण्डलसमुद्रादुच्चलित्वा सहालोकधातुस्तेनोपसंक्रान्तः सर्वगन्ध- येन दामजालावनद्धान् सर्वलोकसमुद्रानधितिष्ठन् सर्वरत्नहारदामजालावनद्धान् सर्वबुद्धक्षेत्रप्रसरानधितिष्ठन् सर्वपुष्पदामहारजालावनद्धान् सर्वबुद्धक्षेत्रप्रसरानधितिष्ठन् सर्वपुष्पदामहारजालावनद्धान् सर्वबुद्धक्षेत्रवंशानधितिष्ठन् सर्वमाल्यदामहारजालावनद्धान् सर्वबुद्धक्षेत्रपरिवर्तानधितिष्ठन् सर्ववज्रहाराधस्तलप्रतिष्ठानसंगृहीतानि सर्वबुद्धक्षेत्रपर्षन्मण्डलान्यधितिष्ठन् सर्वमणिरत्नजालावनद्धान् सर्वबुद्धक्षेत्रनयानधितिष्ठन् सर्ववस्त्रदामसमन्तपरिग्रहपरिगृहीतान् सर्वलोकधातूनधितिष्ठन् सर्वरत्नबिम्बहारदामकलापजालावनद्धानि सर्वबुद्धक्षेत्राण्यभिनिर्हरन् श्रीरश्मिमणिरत्नहारदामजालावनद्धानि सर्वक्षेत्राण्यधितिष्ठन् सर्वव्यूहरश्म्यवभासवैरोचनमणिराजदामजालावनद्धानि सर्वबुद्धक्षेत्राण्यधितिष्ठन् सिंहक्रान्तमणिरत्नहारदामजालप्रतिष्ठानसंगृहीतान् सर्वलोकधातूनधितिष्ठन् येन भगवांस्तेनोपसंक्रम्य सार्धं परिवारेण भगवन्तं नमस्कृत्य दक्षिणां दिशमुपनिश्रित्य जगद्विरोचनमणिकूटागाराणि समन्तदिग्विरोचनमणिरत्नपद्मगर्भाणि च सिंहासनान्यभिनिर्माय न्यषीदत्पर्यङ्कमा=

सुवर्णराजसंछादितानि चिन्ताराजमकुटाववद्धानि बोधिसत्त्वशरीराण्यधिष्ठाय॥

उत्तरायां दिश्यनभिलाप्यबुद्धक्षेत्रपरमाणुरजःसमानां लोकधातुसमुद्राणां परेण रत्नवस्त्रावभासध्वजायां लोकधातोर्धर्मधातुगगनश्रीवैरोचनस्य तथागतस्य बुद्धक्षेत्रादसङ्गश्रीराजो नाम बोधिसत्त्वो महासत्त्वः सार्धमनभिलाप्यलोकधातुसमुद्रपरमाणुरजःसमैर्बोधिसत्त्वैस्तेन भगवतानुज्ञातस्ततः पर्षन्मण्डलसमुद्रादुच्चलित्वा येन सहालोकधातुस्तेनोपसंक्रान्तः सर्वरत्नपट्टमेघालंकारं गगनतलमधितिष्ठन्पीतवर्णपीतनिर्भासरत्नवस्त्रमेघालंकारं गगनतलमधितिष्ठन्नानागन्धपरिवासितमणिवस्त्रमेघप्रवर्षितालंकारं गगनतलमधितिष्ठन्नादित्यध्वजमणिराजवस्त्रमेघालंकारं गगनतलमधितिष्ठन्कनकश्रीज्वलनमणिरत्नवस्त्रमेघालंकारं गगनतलमधितिष्ठन्रत्नज्वलनमणिराजवस्त्रमेघालंकारं गगनतलमधितिष्ठन्सर्वज्योतिष्प्रतिविम्बविचित्रमणिवस्त्रमेघालंकारं गगनतलमधितिष्ठन्पाण्डुकम्बलशिलावभासमणिरत्नवस्त्रमेघदशदिक्परिस्फुटं गगनतलमधितिष्ठन्वैरोचनश्रीज्वलनावभासमणिराजवस्त्रमेघदशदिक्परिस्फुटं गगनतलमधितिष्ठन्नवभासोत्तप्तवह्निकुलवैरोचनमणिराजवस्त्रमेघदशदिक्परिस्फुटं गगनतलमधितिष्ठन्सागरव्यूहमणिराजवस्त्रमेघसंछन्नं गगनतलमधितिष्ठन्येन भगवांस्तेनोपसंक्रम्य सार्धं परिवारेण भगवन्तं नमस्कृत्योत्तरां दिशमुपनिश्रित्य सागरसंभवमणिराजकूटागारं वैडूर्यपद्मगर्भसिंहासनानि चाभिनिर्माय न्यषीदत्पर्यङ्कमाभुज्य सिंहक्रान्तमणिराजजालसंछादितानि ज्योतिध्वजमणिचूडाववद्धानि बोधिसत्त्वशरीराण्यधिष्ठाय॥

उत्तरपूर्वस्यां दिश्यनभिलाप्यबुद्धक्षेत्रपरमाणुरजःसमानां लोकधातुसमुद्राणां परेण सर्वमहापृथिवीराजमणिरश्मिप्रमुक्ताया लोकधातोरनिलम्भचक्षुषस्तथागतस्य बुद्धक्षेत्राद्धर्मधातुसुनिर्मितप्रणिधिचन्द्रो नाम बोधिसत्त्वः सार्धमनभिलाप्यलोकधातुसमुद्रपरमाणुरजःसमैर्बोधिसत्त्वैस्तेन भगवतानुज्ञातस्ततः पर्षन्मण्डलसमुद्रादुच्चलित्वा येन सहालोकधातुस्तेनोपसंक्रान्तो रत्नकूटागारमेघसंछन्नान् सर्वलोकधातुप्रसरानधितिष्ठन् गन्धकूटागारमेघसंछन्नान् सर्वलोकधातुप्रसरानधितिष्ठन् धूपकूटागारमे=

प्रणिधानेन संपन्ना असङ्गाचारगोचराः ।
न शक्यं सर्वलोकेन तेषां विज्ञातुमाशयम् ॥७॥
सर्वप्रत्येकसंबुद्धा श्रावका ये च सर्वशः ।
न प्रजानन्ति ते चर्यां न चेषां चित्तगोचरम् ॥८॥
बोधिसत्त्वा महाप्रज्ञा दुर्धर्षा अपराजिताः ।
मूर्ध्वजा असंकीर्णा ज्ञानभूमिपरायणाः ॥९॥
अप्रमेयाः समापन्नास्ते समाधिं महायशाः ।
स्फरित्वा धर्मधातुं हि दर्शयन्ति विकुर्वितम् ॥१०॥

अथ खलु दुर्योधनवीर्यवेगराजो बोधिसत्त्वो बुद्धाधिष्ठानेन दशदिशो व्यवलोक्य तस्यां वेलायामिमा गाथा अभाषत ॥

पुण्यगर्भान्महाप्रज्ञान् बोधिचर्यागतिंगतान् ।
क्षेमंकरान् सर्वलोके पश्यध्वं सुगतात्मजान् ॥१॥
मेधाविनोऽनन्तमतीन् सुसमाहितचेतसः ।
अनन्तमध्यगम्भीरविपुलज्ञानगोचरान् ॥२॥
जेताह्वये महारण्ये महाव्यूहोपशोभिते ।
बोधिसत्त्वसमाकीर्णे सम्यक्संबुद्धआश्रमे ॥३॥
अनिकेताप्रतिष्ठानान् पश्यध्वं सागरान् बहून् ।
दशभ्यो दिग्भ्य आगत्य निषण्णान् पद्मआसने ॥४॥
अप्रतिष्ठाननायूहान्निष्प्रपञ्चाननालयान् ।
असङ्गचित्तान् विरजान् धर्मधातुपरायणान् ॥५॥
ज्ञानध्वजान् महावीरान् वज्रचित्तानकम्पियान् ।
अनिवृतेषु धर्मेषु निर्वाणं दर्शयन्ति ते ॥६॥
दशदिक्क्षेत्रकोटीभ्योऽसंख्येभ्यः समुपागतान् ।
संबुद्धमुपसंक्रान्तान् द्वयसंज्ञाविवर्जितान् ॥७॥
स्वयंभोः शाक्यसिंहस्य पश्यन्तीदं विकुर्वितम् ।
अधिष्ठानेन यस्येमे बोधिसत्त्वाः समागताः ॥८॥

बुद्धधर्मप्रसंभेदा धर्मधातुतलेषु च ।
व्यवहारमात्रसंभेदमारप्राप्ता जिनात्मजाः ॥८॥ ९
धर्मधातोरसंभेदकोट्यन्ते मुनयः स्थिताः ।
अक्षयैश्च प्रकुर्वन्ति पदैर्धर्मप्रभेदनम् ॥१०॥

अथ खलु समन्तश्रीसमुद्गततेजोराजो बोधिसत्त्वो बुद्धाधिष्ठानेन दशदिशो व्यवलोक्य तस्यां वेलायामिमा गाथा अभाषत ॥

पश्यध्वं सत्त्वसारस्य विपुलं ज्ञानमण्डलम् ।
कालाकालमभिज्ञाय धर्मं देशेति प्राणिनाम् ॥१॥
नानातीर्थ्यसमाकीर्णपरवादिप्रमर्दनः ।
यथाशयानां सत्त्वानां संदर्शेति विकुर्वितम् ॥२॥
न च प्रदेश-संबुद्धो न च बुद्धो दिशानुगः ।
अप्रमाणप्रमाणानि नातिक्रान्तो महामुनिः ॥३॥
दिनसंख्यो यथादित्यः प्रभावयति खे व्रजन् ।
एवं ज्ञानविदुः शास्ता अध्वासङ्गप्रभावितः ॥४॥
पूर्णमास्यां यथा रात्रौ भासते चन्द्रमण्डलम् ।
परिपूर्णं तथा शुक्लधर्मैः पश्यति नायकम् ॥५॥
अन्तरीक्षे यथैवेह व्रजत्यादित्यमण्डलम् ।
वितिष्ठते नैवेह तं तथा बुद्धविकुर्वितम् ॥६॥
यथापि गगनं दिक्षु सर्वक्षेत्रेष्वनिश्रितम् ।
एवं लोकप्रदीपस्य ज्ञेयं बुद्धविकुर्वितम् ॥७॥
यथा हि पृथिवी लोके प्रतिष्ठा सर्वदेहिनाम् ।
लोके लोकप्रदीपस्य धर्मचक्रं तथा स्थितम् ॥८॥
यथापि मारुतो ऽसज्जन् क्षिप्रं व्योम्नि प्रवायति ।
बुद्धस्य धर्मता तद्वल्लोकधातुषु वर्तते ॥९॥
अप्स्कन्धे हि यथा सर्वक्षेत्रसंख्याः प्रतिष्ठिताः ।
एवं अध्वगता बुद्धा ज्ञानस्कन्धे प्रतिष्ठिताः ॥१०॥

प्रमाणैरप्रमेयो ऽसौ न शक्यं जानितुं जिनम् ।
असङ्गज्ञानवान् बुद्धः समतिक्रान्तवाक्पथः ॥४॥
पूर्णचन्द्रप्रभो धीरो लक्षणैः सुविचित्रितः ।
क्षपयत्यमितान् कल्पानधितिष्ठन् विकुर्वितः ॥५॥
नयादेकैकतो बुद्धं चिन्तयन् सुसमाहितः ।
अनभिलाप्याः क्षपयेत्कल्पकोटीरचिन्तियाः ॥६॥
गुणैकदेशपर्यन्तं नाधिगच्छेत्स्वयंभुवः ।
निरीक्षमाणो बुद्धो ऽपि बुद्धधर्मा ह्यचिन्तियाः ॥७॥
येषां च प्रणिधिस्तत्र येषां च मनसो रतिः ।
ते ऽप्येवंगोचराः सर्वे भविष्यन्ति सुदुर्दृशाः ॥८॥
पुण्यज्ञानमयानन्तं महासंभारविक्रमाः ।
नयं ह्यवतरन्त्येतं धीमच्चित्ते ऽमले स्थिताः ॥९॥
विपुलः प्रणिधिस्तेषां विपुलश्चित्तसंवरः ।
लप्स्यन्ति विपुलां बोधिमाक्रम्य जिनगोचरम् ॥१०॥

अथ खलु सर्वमारमण्डलविकिरणज्ञानध्वजराजो बोधिसत्त्वो बुद्धाधिष्ठानेन दशदिशो व्यवलोक्य तस्यां वेलायामिमा गाथा अभाषत ॥

असङ्गज्ञानकायत्वादशरीरः स्वयंभुवः ।
अचिन्त्यो ज्ञानविषयः शक्यं चिन्तयितुं न ते ॥१॥
अचिन्त्यैः कर्मभिः शुक्लैर्बुद्धकायः समार्जितः ।
त्रैलोक्यानुपलिप्तो ऽसौ लक्षणव्यञ्जनोज्ज्वलः ॥२॥
समन्तावभानो लोके धर्मधातुविशोधितः ।
बुद्धबोधिरपि द्वारं सर्वज्ञानमहाकरः ॥३॥
विरजो निष्प्रपञ्चश्च सर्वसङ्गविवर्जितः ।
आदित्यभूतो लोकस्य ज्ञानरश्मिप्रमुञ्चनः ॥४॥
भवसंचारविच्छेत्ता त्रैधातुकविशोधनः ।
निष्पत्तिर्बोधिसत्त्वानां बुद्धबोध्याकरस्तथा ॥५॥

सेन बोधिसत्त्वसमाधिना [71] सर्वधर्मवज्रसिंहप्रतिष्ठानेन बोधिसत्त्वसमाधिना [72] सर्वतथागतनिर्माणसंदर्शनसमन्तविज्ञप्त्यभिनिर्हारेण बोधिसत्त्वसमाधिना [73] सर्वतथागतदिवसाक्रमणान्तिना बोधिसत्त्वसमाधिना [74] एकत्र्यध्वसंतापेन बोधिसत्त्वसमाधिना [75] प्रकृतिप्रशान्तसर्वधर्मसमन्तप्रभप्रमुक्तघोषस्वरेण बोधिसत्त्वसमाधिना [76] सर्वबुद्धदर्शनसीमावतिक्रमेण बोधिसत्त्वसमाधिना [77] निरवशेषसर्वधर्मधातुपद्मनलिनीप्रतिबुद्धेन बोधिसत्त्वसमाधिना [78] अनालयधर्मगगनव्यवलोकनेन बोधिसत्त्वसमाधिना [79] एकदिग्दशदिक्सागरसमवसरणावर्तेन बोधिसत्त्वसमाधिना [80] सर्वधर्मधातुतलप्रमुखप्रवेशेन बोधिसत्त्वसमाधिना [81] सर्वधर्मसागरवतिगर्भेण बोधिसत्त्वसमाधिना [82] सर्वसत्त्वप्रभामुञ्चनप्रशान्तकायेन बोधिसत्त्वसमाधिना [83] एकचित्तक्षणसर्वाभिज्ञाप्रणिध्यभिनिर्हारेण बोधिसत्त्वसमाधिना [84] सदासर्वत्रसमन्ताभिसंबोध्यधिष्ठानेन बोधिसत्त्वसमाधिना [85] सर्वधर्मधात्वेकव्यूहानुगमप्रवेशेन बोधिसत्त्वसमाधिना [86] सर्वबुद्धस्मृतिशरीरावभासेन ‸ [87] सर्वजगद्भूरिविशेषज्ञानाभिज्ञेन बोधिसत्त्वसमाधिना [88] चित्तक्षणानन्तधर्मधातुनयस्वकायस्फरणेन बोधिसत्त्वसमाधिना [89] एकनयधर्मधातुसर्वधर्मैकनयव्यूहप्रभेण बोधिसत्त्वसमाधिना [90] सर्वबुद्धधर्ममण्डलचक्रतेजोऽधिष्ठानेन बोधिसत्त्वसमाधिना [91] इन्द्रजालसत्त्वधातुसंग्रहप्रणिधिचर्याधिष्ठानेन बोधिसत्त्वसमाधिना [92] सर्वलोकधातुतलासंभेदेन बोधिसत्त्वसमाधिना [93] पद्मश्रीविकुर्वितसमन्तविक्रामिणा बोधिसत्त्वसमाधिना [94] सर्वसत्त्वकायपरिवर्तज्ञानाभिज्ञेन बोधिसत्त्वसमाधिना [95] सर्वसत्त्वाभिमुखकायाधिष्ठानेन बोधिसत्त्वसमाधिना [96] सर्वसत्त्वस्वराङ्गसागरजगन्मन्त्रसंभेदनयाभिज्ञेन बोधिसत्त्वसमाधिना [97] सर्वजगत्तलभेदज्ञानाभिज्ञेन बोधिसत्त्वसमाधिना [98] महाकरुणाकोशासंभेदगर्भेण बोधिसत्त्वसमाधिना [99] सर्वबुद्धतथागतकोटिप्रवेशेन बोधिसत्त्वसमाधिना [100] सर्वतथागतविमोक्षभवनव्यवलोकनसिंहविजृम्भितेन बोधिसत्त्वसमाधिना। एतत्प्रमुखैरनभिलाप्यबुद्धक्षेत्रपरमाणुरजःसमैर्बोधिसत्त्वसमाधिवर्गावतारैस्ते बोधिसत्त्वास्तान् भगवतो

बोधिसत्त्वसमाधिना

सत्त्वच्युत्युपपत्तिपरिज्ञासु सङ्गः। नास्ति पूर्वनिवासानुस्मृतिमुखावतारेषु सङ्गः। नास्त्यपरान्तकल्पसर्वजगत्संवासेषु सङ्गः। नास्ति प्रत्युत्पन्नाध्वसर्वजगद्विज्ञप्तिषु सङ्गः। नास्ति सर्वसत्त्वरुतमन्त्रसंवृतिपरिज्ञानेषु सङ्गः। नास्ति सत्त्वसंशयच्छेदेषु सङ्गः। नास्ति सर्वसत्त्वेन्द्रियसंभेदावतारेषु सङ्गः। नास्ति सर्वसत्त्वपरिपाकविनयकालोपसंक्रमणेषु सङ्गः। नास्ति रात्रिंदिवक्षणमुहूर्तकालसंज्ञागतावतारेषु सङ्गः। नास्ति दशदिग्बुद्धक्षेत्रेष्वशरीरस्फरणतासु सङ्गः। यदुताभावप्रतिष्ठितानभिसंस्कारविप्रतिलम्भेन अस्याहं कुलपुत्रानभिसंस्कारिकाया ऋद्धेरनुभावेनेह गगनतले चङ्क्रमामि तिष्ठामि निषीदामि निषद्यामि विविधानीर्यापथान्कल्पयाम्यन्तर्धामि प्रादुर्भवामि धूमायामि प्रज्वलामि॥ एकोभूत्वा बहुधा भूत्वैको भवामि। आविर्भावं तिरोभावं प्रत्यनुभवामि तिरःकुड्यं तिरःप्राकारमसज्जन् गच्छामि॥ तद्यथापि नामाकाश आकाशेऽपि पर्यङ्केन क्रमामि। तद्यथापि नाम पक्षी शकुनिः पृथिव्यामप्युन्मज्जनिमज्जनं करोमि। तद्यथोदक उदकेऽप्यसज्जमानो गच्छामि। तद्यथा पृथिव्यां धूमायामि प्रज्वलामि। तद्यथापि नामाग्निस्कन्धः पृथिवीमपि कम्पयामि। इमावपि चन्द्रसूर्यावेवं महर्द्धिकावेवं महानुभावावेवं महौजस्विनौ पाणिना संपरिमार्जयामि। यावद्ब्रह्मलोकं काये च संवर्तयामि। गन्धधूपपटलमेघसंछन्नं लोकं कृत्वा प्रज्वलामि। सर्वरत्नार्चिर्मेघसंछन्नं लोकं कृत्वा सर्वजगत्सदृशनिर्मितमेघान् प्रमुञ्चामि। अनन्तवर्णप्रभासजालमेघान् प्रमुञ्चन् समन्ताद्दिशो निर्यामि। यदुत पूर्वां दिशं निर्यामि दक्षिणां पश्चिमामुत्तरामुत्तरपूर्वां पूर्वदक्षिणां दक्षिणपश्चिमां पश्चिमोत्तरामध ऊर्ध्वामपि दिशं निर्यामि॥ एकैकेन चित्तक्षणेन पूर्वस्यां दिश्येकं लोकधातुमतिक्रमामि द्वावपि दशापि लोकधातुशतमपि लोकधातुसहस्रमपि लोकधातुशतसहस्रमपि लोकधातुकोटीमपि लोकधातुकोटीशतमपि लोकधातुकोटीसहस्रमपि लोकधातुकोटीनियुतशतसहस्रमपि लोकधात्वपरिमाणानपि लोकधातूनप्रमेयानसंख्येयानप्यचिन्त्यानप्यतुल्यानप्यमाप्यानप्यसमन्तानप्यपर्यन्तानप्यसीमाप्राप्तानप्य

सत्त्वच्युत्युपपत्तिपरिज्ञासु सङ्गः। नास्ति पूर्वनिवासानुस्मृतिमुखावतारेषु सङ्गः। नास्त्यपरान्तकल्पसर्वजगत्संवासेषु सङ्गः। नास्ति प्रत्युत्पन्नाध्वसर्वजगद्विज्ञप्तिषु सङ्गः। नास्ति सर्वसत्त्वेहितमन्त्रसंवृतिपरिज्ञानेषु सङ्गः। नास्ति सत्त्वसंशयच्छेदेषु सङ्गः। नास्ति सर्वसत्त्वेन्द्रियसंभेदावतारेषु सङ्गः। नास्ति सर्वसत्त्वपरिपाकविनयकालोपसंक्रमणेषु सङ्गः। नास्ति रात्रिंदिवक्षणमुहूर्तकालसंज्ञागतावतारेषु सङ्गः। नास्ति दशदिग्बुद्धक्षेत्रेष्वशरीरस्फरणतासु सङ्गः। यदुताभावप्रतिष्ठितानभिसंस्कारविप्रतिलम्भेन अस्याहं कुलपुत्रानभिसंस्कारिकाया ऋद्धेरनुभावेनेह गगनतले चङ्क्रमामि तिष्ठामि निषीदामि निपद्यामि विविधानीर्यापथान्कल्पयाम्यन्तर्धामि प्रादुर्भवामि धूमायामि प्रज्वलामि। एको भूत्वा बहुधा भूत्वैको भवामि। आविर्भावं तिरोभावं प्रत्यनुभवामि तिरःकुड्यं तिरःप्राकारमसज्जन् गच्छामि। तद्यथापि नामाकाशे आकाशेऽपि पर्यङ्केन क्रमामि। तद्यथापि नाम पक्षी शकुनिः पृथिव्यामप्युन्मज्जनिमज्जनं करोमि। तद्यथोदके उदकेऽप्यसज्जमानो गच्छामि। तद्यथा पृथिव्यां धूमायामि प्रज्वलामि। तद्यथापि नामाग्निस्कन्धः पृथिवीमपि कम्पयामि। इमावपि चन्द्रसूर्यावेवं महर्द्धिकावेवं महानुभावावेवं महौजस्विनौ पाणिना संपरिमार्जयामि। यावद्ब्रह्मलोकं काये च संवर्तयामि। गन्धधूपपटलमेघसंछन्नं लोकं कृत्वा प्रज्वलामि। सर्वरत्नार्चिर्मेघसंछन्नं लोकं कृत्वा सर्वजगत्संदर्शनिर्मितमेघान् प्रमुञ्चामि। अनन्तवर्णप्रभासजालमेघान् प्रमुञ्चन् समन्ताद्दिशो निर्यामि। यदुत पूर्वां दिशं निर्यामि दक्षिणां पश्चिमामुत्तरामुत्तरपूर्वां पूर्वदक्षिणां दक्षिणपश्चिमां पश्चिमोत्तरामधः ऊर्ध्वामपि दिशं निर्यामि॥ एकैकेन चित्तक्षणेन पूर्वस्यां दिश्येकं लोकधातुमतिक्रामामि द्वावपि दशापि लोकधातुशतमपि लोकधातुसहस्रमपि लोकधातुशतसहस्रमपि लोकधातुकोटीमपि लोकधातुकोटीशतमपि लोकधातुकोटीसहस्रमपि लोकधातुकोटीनियुतशतसहस्रमपि लोकधातूनपरिमाणानपि लोकधातूनप्रमेयानसंख्येयानप्यचिन्त्यानप्यतुल्यानप्यमाप्यानप्यसमन्तानप्यपर्यन्तानप्यसीमाप्राप्तानप्य-

भवामि बहुधा    लोकधातुकोटीशतसहस्रमपि

वोदारा वा हीना वा प्रणीता वा सुखिता वा दुःखिता वा तेषां सर्वेषां तत्प्रमाणं कायमधिष्ठामि परिपाकविनयकालानतिक्रमनतायै ये च सत्त्वा मामुपसंक्रामन्ति तान्सर्वानन्वैव समन्तजवे ऽमोघविक्रमपर्यवसाने बोधिसत्त्वविमोक्षे प्रतिष्ठापयामि ॥ एतमहं कुलपुत्र समन्तजवं तथागतपूजोपस्थानप्रयोगं सर्वसत्त्वपरिपाकानुकूलमसङ्गमुखं बोधिसत्त्वविमोक्षं प्रजानामि किं मया शक्यं बोधिसत्त्वानां महासत्त्वानां महाकरुणाशीलानां महायानप्रतिपत्तिशीलानां बोधिसत्त्वमार्गाविप्रवासशीलानामसङ्गशीलानां बोधिसत्त्वाशयगर्भाविपातनशीलानां बोधिचित्तापरित्यागशीलानां बुद्धधर्माध्यालम्बनशीलानां सर्वज्ञतामनसिकाराविप्रवसितशीलानां गगनसमशीलानां सर्वलोकानिश्रितशीलानामविनष्टशीलानामनुपहतशीलानामखण्डशीलानामच्छिद्रशीलानामशबलशीलानामकल्माषशीलानां^ बोधिसत्त्वानां चर्यां ज्ञातुं गुणा वा वक्तुम् ॥ गच्छ कुलपुत्रेहैव दक्षिणापथे वज्रपुरं नाम द्रमिडपट्टनं तत्र मेघो नाम द्रमिडः प्रतिवसति तमुपसंक्रम्य परिपृच्छ कथं बोधिसत्त्वेन महासत्त्वेन बोधिसत्त्वचर्यायां शिक्षितव्यं कथं प्रतिपत्तव्यम् ॥ अथ खलु सुधनः श्रेष्ठिदारकः सुप्रतिष्ठितस्य भिक्षोः पादौ शिरसाभिवन्द्य सुप्रतिष्ठितं भिक्षुमनेकशतसहस्रकृत्वः प्रदक्षिणीकृत्य सुप्रतिष्ठितस्य भिक्षोरन्तिकात्प्रक्रान्तः ॥४॥

अथ खलु सुधनः श्रेष्ठिदारकस्तं धर्मलोकमनुस्मरन् धर्मप्रसादवेगाविष्टो बुद्धानुगतसंज्ञामनसिकारः चिरत्नवंशानुपच्छेदप्रयुक्तः कल्याणमित्राण्यनुस्मरन् त्र्यध्वलोकावभासितचित्तो महाप्रणिधानानुगतमनस्कारः सर्वसत्त्वधातुपरित्राणयोगप्रवृत्तः सर्वसंस्कृतरत्यनिश्रितचित्तो विरागवंशमुदीरयन् सर्वधर्मस्वभावनिध्यप्तिपरमः सर्वलोकधातुपरिशुद्धिप्रणिध्यनूच्चलितः सर्वबुद्धपर्षन्मण्डलानिश्रितविहारी अनुपूर्वेण वज्रपुरं द्रमिडपट्टनमुपसंक्रम्य मेघं द्रमिडं पर्येषन्नद्राक्षीत् मध्ये नगरशृङ्गाटके धर्मसांकथ्याय सिंहासननिषण्णं दशानां मणिसहस्राणां चक्राक्षरपरिवर्तव्यूहं

विशुद्धशीलानां विरजोनिर्मलशीलानां

कारमदात् ॥ तस्येमां बोधिसत्त्वसंहर्षणीं वाचमुदीरयतो मुखद्वारात्त=
थारूपार्चिस्कन्धो निश्चचार। येनार्चिस्कन्धेन साहस्रो लोकधातुः स्फुटो
ऽभूत्। ये च सत्त्वास्तमवभासं संजानन्ति स्म देवमहर्द्धिका वा देवा
वा नागमहर्द्धिका वा नागा वा यक्षमहर्द्धिका वा यक्षा वा गन्धर्व-
महर्द्धिका वा गन्धर्वा वासुरमहर्द्धिका वासुरा वा गरुडमहर्द्धिका वा
गरुडा वा किंनरमहर्द्धिका वा किंनरा वा महोरगमहर्द्धिका वा महो=
रगा वा मनुष्यमहर्द्धिका वा मनुष्या वामनुष्यमहर्द्धिका वामनुष्या वा
ब्रह्ममहर्द्धिका वा ब्रह्मणो वा ते तेनावभासेनावभासिताः सन्तो मेघस्य
द्रमिडस्यान्तिकमुपसंक्रामन्त एतेषां मेघेन द्रमिडेनाधिष्ठिताशयानां कृता=
ञ्जलिपुटानां ह्लादितकायचित्तानामुदारप्रामोद्यजातानां महागौरवाभिः=
तानां निहतमारध्वजानां मायाशाठ्युपगतानां विप्रसन्नेन्द्रियाणां मेघो
द्रमिडस्तमेव चक्राक्षरपरिवर्तव्यूहं धर्मपर्यायं विस्तरेण संप्रकाशयति श्रो=
दयति प्रवेशयति नयत्यनुगमयति यं श्रुत्वा सर्वे ते ऽविनिवर्तनीया
अभूवन्ननुत्तरायां सम्यक्संबोधौ स पुनरपि धर्मासने निपद्य सुधनं श्रेष्ठि-
दारकमेतदवचत् ॥ अहं कुलपुत्र सरस्वत्या धारण्यालोकस्य लाभी।
सो ऽहमेकद्विचिसाहस्रमहासाहस्रे लोकधातौ देवानां देवपुत्रान् प्रजा=
नामि एवं नागानां यक्षाणां गन्धर्वाणामसुराणां गरुडानां किंनराणां
महोरगाणां मनुष्याणाममनुष्याणां ब्रह्मणां ब्रह्ममन्त्रान् प्रजानामि।
दवानां देवमन्त्रनानात्वं प्रजानामि। एवं नागानां यक्षाणां गन्धर्वा=
णामसुराणा गरुडानां किंनराणां महोरगाणां मनुष्याणाममनुष्याणां
ब्रह्मणां ब्रह्ममन्त्रसभेदं प्रजानामि ॥ तिर्यग्योनिगतानां सत्त्वानां सर्व-
व्यवहारमन्त्रसंज्ञाः प्रजानामि नारकाणां सत्त्वानां मन्त्रसंज्ञाः प्रजाना=
मि। यामलौकिकानां सत्त्वाना नामसंज्ञाः प्रजानामि। आर्यमन्त्रसं=
ज्ञाः प्रजानामि। अनार्यमन्त्रसंज्ञाः प्रजानामि बोधिसत्त्वमन्त्रसत्त्वा य-
वाग्निरुक्तीः प्रजानामि अध्वप्राप्ततथागतस्वराङ्गघोषसागरान् सर्वसत्त्वा=
नां कथारुतमन्त्रसंप्रयुक्तानवतराम्यधिमुच्यामि॥ चित्तक्षणे चित्तक्षणे यथा

ब्रह्ममन्त्रनानात्वं प्रजानामि देवानां दवमन्त्रैकत्वं प्रजानामि। एवं नागानां
यक्षाणा गन्धर्वाणामसुराणा गरुडानां किंनराणां महोरगाणां मनुष्या=
णाममनुष्याणां ब्रह्मणां ब्रह्ममन्त्रैकत्वं प्रजानामि। देवानां देवमन्त्रसंभेदं प्र=
जानामि। एवं नागानां यक्षाणां गन्धर्वाणामसुराणां गरुडानां किंनराणां
महोरगाणां मनुष्याणाममनुष्याणां ब्रह्मणां

कारमदात् ॥ तस्येमां बोधिसत्त्वसंहर्षणीं वाचमुदीरयतो मुखद्वारात्त=
थारूपार्चिस्कन्धो निश्चचार । येनार्चिस्कन्धेन साहस्रो लोकधातुः स्फुटो
ऽभूत् । ये च सत्त्वास्तमवभासं संजानन्ति स्म देवमहर्द्धिका वा देवा
वा नागमहर्द्धिका वा नागा वा यक्षमहर्द्धिका वा यक्षा वा गन्धर्व-
महर्द्धिका वा गन्धर्वा वासुरमहर्द्धिका वासुरा वा गरुडमहर्द्धिका वा
गरुडा वा किंनरमहर्द्धिका वा किंनरा वा महोरगमहर्द्धिका वा महो=
रगा वा मनुष्यमहर्द्धिका वा मनुष्या वामनुष्यमहर्द्धिका वामनुष्या वा
ब्रह्ममहर्द्धिका वा ब्रह्मणो वा ते तेनावभासेनावभासिताः सन्तो मेघस्य
द्रमिडस्यान्तिकमुपसंक्रामन्त एतेषां मेघेन द्रमिडेनाधिष्ठिताशयानां कृता=
ञ्जलिपुटानां ह्लादितकायचित्तानामुदारप्रामोद्यजातानां महागौरवस्थि=
तानां निहतमारध्वजानां मायाशाभ्युपगतानां विप्रसन्नेन्द्रियाणां मेघो
द्रमिडस्तमेव चक्राक्षरपरिवर्तव्यूहं धर्मपर्यायं विस्तरेण संप्रकाशयति श्रे=
दयति प्रवेशयति नयत्यनुगमयति यं श्रुत्वा सर्वे ते ऽविनिवर्तनीया
अभूवन्ननुत्तरायां सम्यक्संबोधौ स पुनरपि धर्मासने निपद्य सुधनं श्रेष्ठि-
दारकमेतदवचत् ॥ अहं कुलपुत्र सरस्वत्या धारण्यालोकस्य लाभी ।
सो ऽहमेकद्विविसाहस्रमहासाहस्रे लोकधातौ देवानां देवपुत्रान् प्रजा=
नामि एवं नागानां यक्षाणां गन्धर्वाणामसुराणां गरुडानां किंनराणां
महोरगाणां मनुष्याणाममनुष्याणां ब्रह्मणां ब्रह्ममन्त्रान् प्रजानामि ।
दवानां देवमन्त्रनानात्वं प्रजानामि । एवं नागानां यक्षाणां गन्धर्वा=
णामसुराणा गरुडानां किंनराणां महोरगाणां मनुष्याणाममनुष्याणां
ब्रह्मणां ब्रह्ममन्त्रसभेदं प्रजानामि ॥ तिर्यग्योनिगतानां सत्त्वानां सर्व-
व्यवहारमन्त्रसंज्ञाः प्रजानामि नारकाणां सत्त्वानां मन्त्रसंज्ञाः प्रजाना=
मि । यामलौकिकानां सत्त्वाना नामसंज्ञाः प्रजानामि । आर्यमन्त्रसं=
ज्ञाः प्रजानामि । अनार्यमन्त्रसंज्ञाः प्रजानामि बोधिसत्त्वमन्त्रसत्त्वाव्य-
वाग्निरुक्तीः प्रजानामि त्र्यध्वप्राप्ततथागतस्वराङ्गघोषसागरान् सर्वसत्त्वा-
नां कथारुतमन्त्रसंप्रयुक्तानवतराम्यधिमुच्यामि॥ चित्तक्षणे चित्तक्षणे यथा

ब्रह्ममन्त्रनानात्वं प्रजानामि देवानां दवमन्त्रैकत्वं प्रजानामि । एवं नागानां
यक्षाणा गन्धर्वाणामसुराणा गरुडानां किंनराणां महोरगाणां मनुष्या=
णाममनुष्याणां ब्रह्मणां ब्रह्ममन्त्रैकत्वं प्रजानामि । देवानां देवमन्त्रसंभेदं प्र=
जानामि । एवं नागानां यक्षाणां गन्धर्वाणामसुराणां गरुडानां किंनराणां
महोरगाणां मनुष्याणाममनुष्याणां ब्रह्मणां

कारमदात् ॥ तस्येमां बोधिसत्त्वसंहर्षणीं वाचमुदीरयतो मुखद्वारात्=
प्रभार्चिस्कन्धो निश्चचार । येनार्चिस्कन्धेन साहस्रो लोकधातुः स्फुटो
ऽभूत् । ये च सत्त्वास्तमवभासं संजानन्ति स्म देवमहर्द्धिका वा देवा
वा नागमहर्द्धिका वा नागा वा यक्षमहर्द्धिका वा यक्षा वा गन्धर्व
महर्द्धिका वा गन्धर्वा वासुरमहर्द्धिका वासुरा वा गरुडमहर्द्धिका वा
गरुडा वा किंनरमहर्द्धिका वा किंनरा वा महोरगमहर्द्धिका वा महो=
रगा वा मनुष्यमहर्द्धिका वा मनुष्या वामनुष्यमहर्द्धिका वामनुष्या वा
ब्रह्ममहर्द्धिका वा ब्रह्माणो वा ते तेनावभासेनावभासिताः सर्वे येन मेघो
द्रमिडस्यान्तिकमुपसंक्रामन्त एतेषां मेघेन द्रमिडेनाभिष्ठितानामयानां कृता=
ञ्जलिपुटानां ह्लादितकायचित्तानामुदारप्रामोद्यजातानां महागौरवस्थि=
तानां निहतमारध्वजानां मायाशाठ्युपगतानां विमलवेदिमाणां मेघो
द्रमिडस्तमेव चक्राक्षरपरिवर्तव्यूहं धर्मपर्यायं विस्तरेण संप्रकाशयति प्रव=
दयति प्रवेशयति नयत्यनुगमयति यं श्रुत्वा सर्वे ते ऽविनिवर्तनीया
अभूवन्ननुत्तरायां सम्यक्संबोधौ स पुनरपि धर्मासने निपद्य सुधनं श्रेष्ठि-
दारकमेतदवचत् ॥ अहं कुलपुत्र सरस्वत्या धारण्यालोकस्य लाभी ।
सो ऽहमेकद्विचित्साहस्रमहासाहस्रे लोकधातौ देवानां देवपुत्रान् प्रजा=
नामि एवं नागानां यक्षाणां गन्धर्वाणामसुराणां गरुडानां किंनराणां
महोरगाणां मनुष्याणाममनुष्याणां ब्रह्मणां ब्रह्ममन्त्रान् प्रजानामि ।
दवानां देवमन्त्रनानात्वं प्रजानामि । एवं नागानां यक्षाणां गन्धर्वा=
णामसुराणां गरुडानां किंनराणां महोरगाणां मनुष्याणाममनुष्याणां
ब्रह्मणां ब्रह्ममन्त्रसभेदं प्रजानामि ॥ तिर्यग्योनिगतानां सत्त्वानां सर्व
व्यवहारमन्त्रसंज्ञाः प्रजानामि नारकाणां सत्त्वानां मन्त्रसंज्ञाः प्रजाना=
मि । यामलौकिकानां सत्त्वाना नामसंज्ञाः प्रजानामि । आर्यमन्त्रसं=
ज्ञाः प्रजानामि । अनार्यमन्त्रसंज्ञाः प्रजानामि बोधिसत्त्वमन्त्रसत्त्वाश्रय-
वाग्निरुक्तीः प्रजानामि त्र्यध्वप्राप्ततथागतस्वराङ्गघोषसागरान् सर्वसत्त्वा=
नां कथारुतमन्त्रसंप्रयुक्तानवतराम्यधिमुच्यामि॥ चित्तक्षणे चित्तक्षणे यथा
ब्रह्ममन्त्रनानात्वं प्रजानामि देवानां देवमन्त्रैकत्वं प्रजानामि । एवं नागानां
यक्षाणां गन्धर्वाणामसुराणां गरुडानां किंनराणां महोरगाणां मनुष्या=
णाममनुष्याणां ब्रह्मणां ब्रह्ममन्त्रैकत्वं प्रजानामि । देवानां देवमन्त्रसंभेदं प्र=
जानामि । एवं नागानां यक्षाणां गन्धर्वाणामसुराणां गरुडानां किंनराणां
महोरगाणां मनुष्याणाममनुष्याणां ब्रह्मणां

मात्सर्यमलं विनिवर्तयमानान् सर्वग्राहोत्सर्गे सत्त्वान्नियोजयमानान् विचित्रसर्वरत्नालंकारालंकृतं लोकमधितिष्ठमानान् दानपारमितायां सत्त्वान् प्रतिष्ठाप्य परिष्कारवशितायां प्रतिष्ठापयमानान् सर्वलक्षणगुणान् संवर्णयमानान् बुद्धलक्षणसंभवे हेतुमुपदिश्यमानानपश्यत् । असंख्येयबुद्धक्षेत्रपरमाणुरजःसमांश्च बोधिसत्त्वान्निश्चरित्वा शीलपारमितां संवर्णयमानान् सर्वबुद्धानां शीलपारमितासंप्रयुक्तान् पूर्वयोगसमुद्रान् सर्वरोमविवरेभ्यः संदर्शयमानान् सर्वसत्त्वान् सर्वलोकगतिविषयेभ्यो विमुखीकृत्य तथागतविषयाभिमुखीकुर्वाणान् कामलोकं विजुगुप्समानान् विपर्यासपटलं लोके विकिरमाणान् वितथपरिकल्पान् प्रशमयित्वा बोधिसत्त्वशीलसंनियोजयमानान् महाकरुणाशीलं संवर्णयित्वा तथागतशीलप्रतिलम्भाय बुद्धमार्गप्रतिपत्तिशीले सत्त्वान् प्रतिष्ठापयमानान् स्वप्नोपमां भवगतिं सत्त्वानां प्रभावयित्वा स्वप्नविधिसमवसरणतायै विषयपरिग्रहक्लेशवशितायां सत्त्वान् प्रतिष्ठापयमानानपश्यत् ॥ असंख्येयबुद्धक्षेत्रपरमाणुरजःसमांश्च बोधिसत्त्वान्निश्चर्य सुवर्णवर्णच्छवितां लोके ऽभिद्योतयमानान् अक्रोधानुपायासतायामखिलदुष्टाविनष्टाप्रतिहतचित्तायां प्रतिष्ठापयमानान् सर्वतिर्यग्योनिगतिसमुच्छेदाय सर्वरोममुखेभ्यः क्षान्तिपारमितासंप्रयुक्तांस्तथागतपूर्वयोगमेघान्निश्चारयमानान् क्षान्तिबले सत्त्वान् प्रतिष्ठापयमानान् धर्मवशितायां सत्त्वानवभासयमानानपश्यत् ॥ असंख्येयबुद्धक्षेत्रपरमाणुरजःसमांश्च बोधिसत्त्वान्निश्चर्यानन्तबोधिसत्त्ववीर्यबलं संदर्शयमानान् सर्वव्रतारम्भाविवर्त्यबलेन सर्वश्रुतसागरपर्येष्टपरिखेदतां संवर्णयमानान् सर्वतथागतपूजोपस्थाने सत्त्वान्नियोजयमानान् सर्वदुःखस्कन्धविनिवर्तनमहावीर्यारम्भे सत्त्वान् प्रतिष्ठापयमानान् वीर्यपारमिताप्रतिसंयुक्तान् पूर्वयोगमेघान् सर्वशरीरान्निश्चारयमाणान् बोधिसत्त्ववीर्यपारमिताचर्यां संदर्शयमानान् कौसीद्यपर्वतान् सत्त्वानां विकिरमाणान् वीर्यपारमितायां सत्त्वान् प्रतिष्ठापयमानान् कर्मवशितायां लोकं विनियोजयमानानधिष्ठानप्रयुक्ता=

सत्त्वान्

भासान् सर्वदशदिक्प्रतापनाप्रमाणदीप्तप्रभामण्डलधर्मधातुनयस्फरणघोषान् । अनन्तमध्यबुद्धविकुर्वितसंदर्शनान् सर्वजगदसंभिन्नधर्ममेघाभिप्रवर्षमाणान् यदुत बोधिमण्डवरगतानां बोधिसत्त्वानां समन्तधर्मधातुतलभेदाभिमुखज्ञानमेघं नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । अभिषेकप्राप्तानां बोधिसत्त्वानां समन्ततलमेघं नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । महाधर्मयौवराज्याभिषिक्तानां बोधिसत्त्वानां समन्तमुखप्रवेशं नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । कुमारभूताना बोधिसत्त्वानां समन्तव्यूहं नाम धर्ममेघप्रवर्षमभिप्रवर्षमाणान् । अविवर्त्यानां बोधिसत्त्वानां महाकरुणादृढकूटं नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । शुद्धाध्याशयानां बोधिसत्त्वानां सर्वधर्मस्वभावभेदज्ञानवज्रं नाम धर्ममेघवर्षमा^णान् । पूर्वयोगसंपन्नानां बोधिसत्त्वानां समन्तजगत्संग्रहव्यूहं नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । जन्मजानां^ त्र्यध्वतथागतपर्षन्मण्डलाभिमुखविज्ञप्तिमेघं नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । योगाचाराणां बोधिसत्त्वानां सर्वधर्मस्वभावतलनिर्घोषं नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । आदिकर्मिकाणां बोधिसत्त्वानां महाकरुणानयोपायगर्भमेघसंभवं नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । प्रथमचित्तोत्पादिकानां बोधिसत्त्वानां प्रग्रहकोशोपचयगर्भं नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । उदाराधिमुक्तिकाना बोधिसत्त्वानामक्षयविमोक्षतथागतप्रणिधिप्रग्रहकोशं नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । रूपावचराणां सत्त्वानां समन्ततलाक्षयकोश नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । ब्रह्मकायिकानां देवानामप्रमाणनयसागरनिगर्जितघोषं नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । वशवर्तिनां देवानां बलसंभवधर्मोपकरणाक्षयकोशं नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । मारकायिकानां देवानां चित्रध्वजसर्वज्ञतासंभारसमार्जनघोष नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । निर्माणरतीनां देवानां ज्ञानरत्नविचित्रपुरं नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । तुषितानां देवानां बोधिसत्त्वप्रणिधिविचित्रध्वजं नाम धर्ममेघवर्षमभिप्रवर्षमाणान् । यामा=

दोत्तमाङ्गच्छेदाधिवासनविकुर्वितं पाणिदण्डशस्त्रशरीरोपनिपाताधिवासनविकुर्वितं सर्वशरीरभेदनहृदयनयनोद्धरणाधिवासनविकुर्वितमपश्यत् । यैरप्यन्यैस्त्र्यध्वप्राप्तबोधिसत्त्वविकल्पितात्मभावैः सर्वज्ञताधर्मपर्येष्टिनिदानं सर्वकायिकचैतसिकप्रपीडितान्यङ्गप्रत्यङ्गच्छेदनानि महाकरुणाप्रपीडितैरधिवासितानि मर्षितान्यध्युपेक्षितानि तान्यपि सर्वबोधिसत्त्वक्षान्तिचर्याविकुर्वितप्रतिबिम्बरूपाण्यपश्यत् । कुतश्चिद्रोममुखरश्मिजालात्सर्वबोधिसत्त्ववीर्यचर्याधिमात्रताविभक्तरूपाण्यतीतानागतप्रत्युत्पन्नानि बोधिसत्त्वविकुर्वितानि लोकसंकम्पनसागरसंक्षोभनसत्त्वसंवेजनसर्वतीर्थ्यसंत्रासनमारमण्डलविद्रापणधर्मदिग्द्योतनमहाबोधिविक्रमविकुर्वितान्यपश्यत् । कुतश्चिद्रोममुखरश्मिजालमण्डलाद्यानि सर्वबोधिसत्त्वचर्याविचाररूपाणि यान्यात्मभावोपादानानि ये कुलोपपत्तिपरिग्रहाय रूपकायपरिनिष्पत्तये ये कल्याणमित्रानुशासनीपरिग्रहा यानि कल्याणमित्रोपदेशप्रतिपत्तिस्थानानि यानि तथागतध्यानाङ्गपरिनिष्पत्त्यनुरूपविहारभवनविमानजनपदगिरिकन्दराणि यानि रिषिशरीराणि यैस्तानि ध्यानाङ्गानि निष्पादितानि यानि नृपाधिपत्यानि यानि नैष्क्रम्यमुखानि ये व्रतसमादानाकल्पेर्यापथास्तत्सर्वं सुधनः श्रेष्ठिदारको ऽपश्यत् । कुतश्चिद्रोममुखरश्मिजालमण्डात्प्रज्ञापारमिताचर्याविहारसर्वधर्मपर्येष्टिसंप्रयुक्तान् कायपरिग्रहानपश्यत् । यैः कायैरेकैकधर्मपदं सर्वास्तिपरित्यागितया सर्वसत्त्वानामन्तिकात्पर्येषितं सर्वोपस्थानपरिचर्यया सर्वकल्याणमित्रसकाशात्पर्येषितं श्रद्धागौरवनिर्जातेन च कायप्रणामेन तथागतसकाशात्पर्येषितं यथा चैकत्वं धर्मपदं तथा सर्वधर्मपदानि प्रज्ञापारमितासंप्रयुक्तानि यानि सर्वजगदुपपत्तिप्रतिभासैः कायैः पर्येषितानि तत्सर्वं सुधनः श्रेष्ठिदारक एकैकस्माद्रोममुखरश्मिजालमण्डलादपश्यत । कुतश्चिद्रोममुखरश्मिजालमण्डलात्सर्वबोधिसत्त्वपरिपाकोपायसत्त्वगतिसमुद्रप्रसरितान् सर्वसत्त्वसंग्रहप्रयोगानपश्यत । एकैकं च सत्त्वं सर्वसत्त्वकायसदृशैरात्मभावोपचारमुखैः पूर्वात्मभावोपादानैरुपायकौशल्यचर्याप्रयुक्तैः संगृह्यमानं तत एकैकस्माद्रोममुख-

नभिलाप्यानभिलाप्यस्यार्थाय न सत्त्वानभिलाप्यानभिलाप्यपरिवर्तस्यार्थाय । नैकलोकधातुपर्यापन्नानां सत्त्वानामर्थाय^ न चातुर्द्वीपकलोकधातुपरमाणुरजःसमलोकधातुपर्यापन्नानां सत्त्वानामर्थाय न सहस्रलोकधातुपरमाणुरजःसमलोकधातुपर्यापन्नानां सत्त्वानामर्थाय न द्विसाहस्रलोकधातुपरमाणुरजःसमलोकधातुपर्यापन्नानां सत्त्वानामर्थाय न त्रिसाहस्रमहासाहस्रलोकधातुपरमाणुरजःसमलोकधातुपर्यापन्नानां सत्त्वानामर्थाय न यावदनभिलाप्यानभिलाप्यत्रिसाहस्रमहासाहस्रलोकधातुपरमाणुरजःसमलोकधातुपर्यापन्नानां सत्त्वानामर्थाय बोधिसत्त्वानां बोधाय चित्तमुत्पद्यन्ते यदुत परिपाकविनयाय ॥ अपि त्वशेषनिःशेषसर्वलोकधातुपर्यापन्नानां सर्वसत्त्वानामर्थाय बोधिसत्त्वानां बोधाय चित्तमुत्पद्यते यदुत परिपाकविनयाय । नैकबुद्धारागणतायै बोधिसत्त्वानां बोधाय चित्तमुत्पद्यते यदुतारागणाभिराधनपूजोपस्थानतायै न द्वयबुद्धारागणाभिराधनपूजोपस्थानतायै । न यावदनभिलाप्यानभिलाप्यलोकधातुपरमाणुरजःसमबुद्धारागणाभिराधनपूजोपस्थानतायै बोधिसत्त्वानां बोधाय चित्तमुत्पद्यते । नैकलोकधातुपर्यापन्नबुद्धवंशारागणाभिराधनपूजोपस्थानतायै न यावदनभिलाप्यानभिलाप्यबुद्धक्षेत्रपरमाणुरजःसमलोकधातुपर्यापन्नतथागतवंशारागणाभिराधनपूजोपस्थानतायै बोधिसत्त्वानां बोधाय चित्तमुत्पद्यते । नैकबुद्धक्षेत्रपरिशोधनाय न यावदनभिलाप्यानभिलाप्यलोकधातुपरमाणुरजःसमबुद्धक्षेत्रपरिशोधनाय बोधिसत्त्वानां बोधाय चित्तमुत्पद्यते । नैकशासनसंधारणाय न यावदनभिलाप्यानभिलाप्यबुद्धक्षेत्रपरमाणुरजःसमतथागतशासनसंधारणाय बोधिसत्त्वानां बोधाय चित्तमुत्पद्यते । नैकबुद्धस्थानप्रणिधानविमात्रतावरणाय न यावदनभिलाप्यानभिलाप्यबुद्धक्षेत्रपरमाणुरजःसमबुद्धप्रस्थानप्रणिधानविमात्रावरणाय बोधिसत्त्वानां बोधाय चित्तमुत्पद्यते । नैकतथागतबुद्धक्षेत्रव्यूहावतरणतायै न यावदनभिलाप्यानभिलाप्यबुद्धक्षेत्रपरमाणुरजःसमतथागतबुद्धक्षेत्रव्यूहावतरणाय बोधिसत्त्वानां बोधाय चित्तमुत्प=

न यावदनभिलाप्यानभिलाप्यलोकधातुपर्यापन्नानां सत्त्वानामर्थाय

वनयावभासनतया । सर्वशरीरेण प्रणिपत्योत्थाय भीष्मोत्तरनिर्घोषमृषिमनेकशतसहस्रकृत्वः प्रदक्षिणीकृत्य प्राञ्जलीभूतः पुरतः स्थित्वा मनोज्ञोपचारेण मनोज्ञां वाचमुदीरयन्नेवमाह ॥ मयार्यानुत्तरायां सम्यक्संबोधौ चित्तमुत्पादितं न च जानामि कथं बोधिसत्त्वेन बोधिसत्त्वचर्यायां शिक्षितव्यं कथं प्रतिपत्तव्यम् । श्रुतं च मे आर्यो बोधिसत्त्वाववादानुशासनीं ददातीति । तद्वदतु मे आर्यः कथं बोधिसत्त्वेन बोधिसत्त्वचर्यायां शिक्षितव्यं कथं प्रतिपत्तव्यम् ॥

अथ खलु भीष्मोत्तरनिर्घोष ऋषिस्तानि दशमाणवकसहस्राण्यनुविलोक्यैवमाह ॥ अनेन माणवकाः कुलपुत्रेणानुत्तरायां सम्यक्संबोधौ चित्तमुत्पादितं सर्वसत्त्वाश्वाभयेनोपनिमन्त्रिताः । अयं स कुलपुत्रः सर्वसत्त्वहितसुखाय प्रत्युपस्थितो ज्ञानसागराभिमुखः सर्वतथागतानां धर्ममेघान् धातुकामः सर्वधर्मनयसागरानवगाहयितुकामः । महाज्ञानालोकेऽवस्थातुकामो महाधर्मवर्षमभिप्रवर्षितुकामो महाज्ञानचन्द्र उदागत्य सर्वक्लेशप्रतापं प्रशमयितुकामः सर्वसत्त्वकुशलमूलानि वर्धयितुकामः ॥ अथ खलु तानि दशमाणवकसहस्राणि नानावर्णैः सुरुचिरैः सुगन्धैः पुष्पैः सुधनश्रेष्ठिदारकमवकीर्याभ्यवकीर्याभिवन्द्य नमस्कृत्वा प्रणिपत्य प्रदक्षिणीकृत्यैवंवाचमुदीरयामासुः । एष त्राता भविष्यति सर्वसत्त्वानां सर्वनिरयदुःखानि प्रशमयिष्यति । सर्वतिर्यग्योनिगितिं व्यवच्छेत्स्यति सर्वयमलोकगतिं विनिवर्तयिष्यति। सर्वाक्षणद्वारकपाटानि पिथपयिष्यति तृष्णासमुद्रमुच्छोषयिष्यति तृष्णाबन्धनं छेत्स्यति । दुःखस्कन्धं विनिवर्तयिष्यति । अविद्यान्धकारं विधमयिष्यति पुण्यचक्रवाडं लोके परिसंस्थापयिष्यति। ज्ञानरत्नाकरमुपदर्शयिष्यति। ज्ञानसूर्य उदागमिष्यति धर्मचक्षुर्विशोधयिष्यति । समविषमं लोके संप्रकाशयिष्यति ॥ अथ खलु भीष्मोत्तरनिर्घोष ऋषिस्तान्माणवकानेवमाह ॥ येन माणवका अनुत्तरायां सम्यक्संबोधौ चित्तमुत्पादितं भवति स बोधिसत्त्वचर्यां चरन् सर्वसत्त्वानां सुखमुत्पादयत्यनुपूर्वेण च सर्वज्ञतां

महाकरुणामेघमुपस्थापयितुकामो

प्रतिलभन्ते ॥ अनेन माणवकाः कुलपुत्रेणानुत्तरायां सम्यक्संबोधौ चित्तमुत्पादितं स एष सर्वबुद्धगुणभूमिं परिपूरयिष्यति ॥ अथ खलु भीष्मोत्तरनिर्घोष ऋषिः सुधनं श्रेष्ठिदारकमेतदवोचत् ॥ अहं कुलपुत्रापराजितध्वजस्य बोधिसत्त्वस्य विमोक्षस्य लाभी ॥ सुधन आह ॥ क एतस्यार्यापराजितध्वजस्य विमोक्षस्य विषयः ॥ ततो भीष्मोत्तरनिर्घोष ऋषिर्दक्षिणं पाणिं प्रसार्य सुधनं श्रेष्ठिदारकं शिरसि परिमार्ज्य दक्षिणेन पाणिना पर्यगृह्णत् । समनन्तरपरिगृहीतश्च सुधनः श्रेष्ठिदारको भीष्मोत्तरनिर्घोषेण ऋषिणा दक्षिणेन पाणिना अथ तावदेव सुधनः श्रेष्ठिदारको ऽपश्यद्दशसु दिक्षु दशबुद्धक्षेत्रशतसहस्रपरमाणुरजःसमानि बुद्धक्षेत्राणि तेषु च दशबुद्धक्षेत्रशतसहस्रपरमाणुरजःसमानां तथागतानां पादमूलगतमात्मानं संजानाति स्म ॥ तानि च बुद्धक्षेत्राण्यपश्यद्संख्येयाकारविशुद्धव्यूहानि तेषु च तथागतपर्षन्मण्डलसमुद्रान्नानावर्णविचित्रव्यूहानपश्यत् । तेषु च पर्षन्मण्डलसमुद्रेषु तथागतशरीराणि लक्षणानुव्यञ्जनोज्ज्वलितोपचितान्यपश्यत् । तेभ्यश्च धर्मदेशनां शृणोत्येकपदव्यञ्जनापराङ्मुखाम् । तानि च तथागतधर्मचक्राण्यन्योन्यसंभिन्नानि संधारयति । तांश्च धर्ममेघान्नानासत्त्वाशयेषु प्रवर्षणां संप्रतीच्छति । तेषां च तथागतानां नानाधिमुक्तिबलविशोधितं पूर्वप्रणिधानसमुद्रानवतरति । तांश्च नानाप्रणिधानसागरविशुद्धान् बुद्धसमुदागमसमुद्रानवतरति । तांश्च यथाशयसर्वसत्त्वसंतोषणविज्ञापनान् बुद्धवर्णान् अद्राक्षीत् । तानि च बुद्धरश्मिजालानि नानाविरागविशुद्धव्यूहमण्डलान्यपश्यत् । तानि च बुद्धबलान्यनावरणज्ञानालोकानुगमेनावतरति । स क्वचित्तथागतपादमूले रात्रिंदिवं संजानाति क्वचित्सप्त रात्रिंदिवानि क्वचिदर्धमासं क्वचन्मासं क्वचित्संवत्सरं क्वचिद्वर्षशतं क्वचिद्वर्षसहस्रं क्वचिद्वर्षशतसहस्रं क्वचिद्वर्षकोटीं क्वचिद्वर्षकोटीशतं क्वचिद्वर्षकोटीसहस्रं क्वचिद्वर्षकोटीशतसहस्रं क्वचिद्वर्षकोट्ययुतं क्वचिद्वर्षकोटीनियुतं क्वचिदर्धकल्पं संजानाति । क्वचित्कल्पं क्वचित्कल्पशतं क्वचित्कल्पसहस्रं क्वचित्कल्पशतस=

बोधिसत्त्वस्य

हैव दक्षिणापथे इषाणो नाम जनपदस्तत्र जयोष्मायतनो नाम ब्राह्मणः प्रतिवसति तमुपसंक्रम्य परिपृच्छ कथं बोधिसत्त्वेन बोधिसत्त्वचर्यायां शिक्षितव्यं कथं प्रतिपत्तव्यम् ॥

अथ खलु सुधनः श्रेष्ठिदारकस्तुष्ट उदग्र आत्तमनाः प्रमुदितः प्रीतिसौमनस्यजातो भीष्मोत्तरनिर्घोषस्यर्षेः पादौ शिरसाभिवन्द्य भीष्मोत्तरनिर्घोषमृषिमनेकशतसहस्रकृत्वः प्रदक्षिणीकृत्य पुनः पुनरवलोक्य भीष्मोत्तरनिर्घोषस्यर्षेरन्तिकात्प्रक्रान्तः ॥९॥

अथ खलु सुधनः श्रेष्ठिदारकोऽपराजितध्वजबोधिसत्त्वविमोक्षज्ञानावभासितः । अचिन्त्यबुद्धविषयविकुर्वितप्रत्यक्षविहारी । अचिन्त्यबोधिसत्त्वविमोक्षप्रत्यक्षज्ञानाभिज्ञः । अचिन्त्यबोधिसत्त्वसमाधिज्ञानावभासितचित्तः सर्वकालसमवसरणसमाधिज्ञानावभासितप्रतिलब्धः सर्वसंज्ञासंगतसमवसरणसमाधिविषयावभासितः सर्वजगद्विशेषवतिज्ञानालोकप्रतिलब्धः सर्वत्र्यध्वानुगतगोचरविहाराभिमुखः । अद्वयविकल्पसमतानिर्देशज्ञानपरमः सर्वारम्बणप्रसरितज्ञानालोकः सत्त्वश्रद्धाभिमुखक्षान्तिविशुध्यधिमुक्तिकोशकुशलः स्वभावधर्मक्षान्तिनिश्चयज्ञानालोकप्रतिलब्धः सर्वत्रानुगताभिज्ञबोधिसत्त्वचर्यास्वभावभावनाविरहितचित्तः सर्वज्ञतावेगाविवर्त्यचित्तो दशबलज्ञानविद्युदवभासप्रतिलब्धः । धर्मधातुनिर्घोषाभिलाषावितृप्तचित्तः सर्वज्ञताविहारगोचरावतरणप्रतिपत्तिचित्तः । अनन्तबोधिसत्त्वचर्याव्यूहाभिनिर्हारचित्तोऽनन्तबोधिसत्त्वमहाप्रणिधानमण्डलपरिशोधनचित्तः । अनन्तमध्यलोकधातुजालाक्षयानुगमज्ञानाभिमुखचित्तः । अनन्तसत्त्वसागरपरिपाकविनयासंकुचितचित्तः । अनन्तबोधिसत्त्वचर्याविषयं संपश्यन् । ^अनन्तलोकधातुविभक्तिविचित्रतां संपश्यन् । अनन्तलोकधातुसूक्ष्मोदारारम्बणान्तर्गतां संपश्यन् । अनन्तलोकधातुप्रतिष्ठानसंज्ञाजालविचित्रितां संपश्यन् । अनन्तलोकधातुव्यवहारप्रज्ञप्तिसंवृतिविमात्रतां संपश्यन् । अनन्तसत्त्वाधिमुक्तिविमा=

^ अनन्तलोकधातुगतिविमात्रतां संपश्यन् ।

चेतनां दृढीकार्षीः । एष कुलपुत्रार्यो वज्रार्चिःसमाध्यवभासलब्धः । अविवर्तवीर्यो महारम्भोत्तारणप्रतिपन्नः सर्वजगत्स्नेहपर्यादानायाभ्युत्थितः सर्वदृष्टिगतजालदालनाय प्रयुक्तः । सर्वक्लेशकर्मकक्षनिर्दहनाय प्रत्युपस्थितः सर्वाक्षणज्ञानकान्तारावभासनायोद्युक्तः सर्वसत्त्वजरामरणप्रपातभयविनिवर्तनाय व्यवस्थितः त्र्यध्वान्धकारविधमनताया अभियुक्तः सर्वधर्मरश्मिप्रमुञ्चनतायै प्रतिपन्नः ॥ एतस्य हि कुलपुत्र पञ्चतपस्तप्यमा[illegible] केचिद्ब्राह्मणाः कर्तृत्वमीश्वरत्वं सर्वलोकज्येष्ठत्वमात्मनि मन्यन्ते । विविधदृष्टिगताभिनिविष्टाः तस्यासमोग्रतपोव्रतसमादानप्रभा[illegible]न सर्वस्वभवनेषु न रमन्ते ॥ ते ध्यानरतिमनास्वादयन्तो ऽस्य सकाशमुपसंक्रामन्ति ॥ तानेष आगतानृद्ध्यनुभावेनाभिसंभूयोग्रव्रततपसा च तेभ्यः सर्वदृष्टिगतविवर्तनाय सर्वमानमदप्रहाणाय च धर्मं देशयति ॥ सर्वजगन्महामैत्रीमहाकरुणास्फरणतायै,‸सर्वबुद्धसंदर्शनाभिमुखतायै बुद्धस्वरमण्डलप्रतिलम्भपरिपूरणाय सर्वत्रानुरवणबुद्धघोषाप्रतिघातानावरणतायै च धर्मं देशयति ॥

दश च मारसहस्राण्युपर्यन्तरीक्षे स्थित्वा दिव्यैर्मणिरत्नैरभ्यवकीर्यैवमाहुः ॥ अस्य कुलपुत्र पञ्चतपस्तप्यतो ऽस्मादर्चिस्कन्धादाभा निश्चरित्वास्मद्भवनान्यात्मभावनाभरणपरिभोगांश्च जिह्मीकुर्वन्ति । ते वयं वेगजाताः सपरिवारा एतस्य सकाशमुपसंक्रमाम उपसंक्रान्तानां चैषो ऽस्माकं तथा तथा धर्मं देशयति यथा स्वचित्तप्रतिलब्धा बोधाय चित्तमुत्पाद्याविनिवर्तनीया भवामो ऽनुत्तरायां सम्यक्संबोधौ ॥

दश च वशवर्तिदेवराजसहस्राणि दिव्यैः पुष्पैरभ्यवकीर्यैवमाहुः ॥ वयं कुलपुत्रास्य पञ्चतपस्तप्यतः स्वभवनेषु रतिं न विन्दामः । ते वयं सस्वजनपरिवारा एतस्य सकाशमुपसंक्रमामः स एषो ऽस्माकमुपसंक्रान्तानां स्वचित्तवशवर्तिताप्रतिलम्भाय धर्मं देशयति । सर्वक्लेशवशिताप्रतिलाभाय यथाभिप्रायोपपत्तिवशिताप्रतिलाभाय सर्वकर्मावरणविशुद्धिवशिताप्रतिलाभाय सर्वसमापत्तिवशवर्तिताप्रतिलाभाय प=

बोध्यासनदृढीकरणतायै बोधिचित्तोत्पादविपुलकरणतायै

कुलपुत्र पञ्चतपस्तप्यतो वायुसमीरिताभ्यो ऽस्मद्भवनगततालपङ्क्तिभ्यः किङ्किणीजालरत्नसूत्रदामवाद्यवृक्षेभ्यो सर्ववाद्यभाण्डरत्नाभरणगृहपरिभोगेभ्यो बुद्धशब्दो निश्चरति । धर्मशब्दो विवर्त्य बोधिसत्त्वसंघशब्दो बोधिसंप्रस्थानप्रणिधानशब्दो निश्चरति । अमुष्यां लोकधातुसंख्यायाममुको नाम बोधिसत्त्वो बोधाय प्रणिदधाति । अमुष्यां लोकधातुसंख्यायाममुको नाम बोधिसत्त्वो दुष्करपरित्यागं करोति । अमुष्यां लोकधातुसंख्यायामेवंनामा बोधिसत्त्वो सर्वज्ञताज्ञानमण्डलं परिशोधयति । अमुष्यां लोकधातुसंख्यायामेवंनामा बोधिसत्त्वो बोधिमण्डलमुपसंक्रामति । अमुष्यां लोकधातुसंख्यायामेवंनामा बोधिसत्त्वो सर्वबलं मारं पराजित्यानुत्तरां सम्यक्संबोधिमभिसंबुध्यते । अमुष्यां लोकधातुसंख्यायामेवंनामा तथागतो धर्मचक्रं प्रवर्तयति । अमुष्यां लोकधातुसंख्यायाममुको नाम तथागतो ऽनवशेषबुद्धकार्यं कृत्वानुपधिशेषनिर्वाणधातौ परिनिर्वातीति ॥ अपर्यन्ताः कुलपुत्र भवेज्जम्बुद्वीपे सर्वतृणकाष्ठशाखापत्रपलाशानां परमाणुभागशः परिच्छिन्नानां न त्वेव तेषां तथागतनाम्ना बोधिसत्त्वप्रणिधीनां बोधिसत्त्वचर्याप्रस्थानविशेषाणां यो ऽस्मद्भवनगततालपङ्क्तिभ्यो यावत्सर्ववाद्यभाण्डरत्नाभरणगृहपरिभोगेभ्यो वायुसमीरितेभ्यो निश्चरन्त्यनुरवति श्रोत्रविज्ञप्तिमागच्छति ॥ ते वयं कुलपुत्र बुद्धसंघबोधिसत्त्वप्रस्थानप्रणिधिचर्यानामनिर्घोषेण महाप्रीतिवेगहर्षसंजाता एतस्य सकाशमुपसंक्रमामः स एषो ऽस्माकमुपसंक्रान्तानां तथा धर्मं देशयति यदस्मत्परिषद्यनेके सत्त्वा अविवर्त्या भवन्त्यनुत्तरायाः सम्यक्संबोधेः ॥

अपरिमाणानि च कामावचरदेवपुत्रसहस्राण्युदारोदारवर्णान्याकाशे स्थित्वा मनोमय्या पूजया पूजयित्वैवमाहुः ॥ अस्य पञ्चतपस्तप्यत कुलपुत्र एभ्यो ऽग्निकूटेभ्यस्तथारूपा प्रभा निश्चरति यया प्रभयावीचिपर्यन्ताः सर्वनिरयानवभास्य सर्वनैरयिकसत्त्वदुःखानि प्रतिप्रश्रब्धानि । तयैव प्रभयास्माकं चक्षुष आभासमागच्छन्ति ॥ ते वयमस्योपरि चित्तानि प्र=

एष च मे समन्तव्यूहः प्रज्ञापारमितामुखपरिवर्तः षट्त्रिंशद्गङ्गानदीवालिकासमानां तथागतानामन्तिकात्पर्यन्विष्टस्ते च मे तथागतनानामुखप्रवेशैरेत समन्तव्यूहं प्रज्ञापारमितामुखपरिवर्तमवतारयामासुः। यच्चैकेन देशितं न द्वितीयेन॥ आह॥ क एतस्यार्य समन्तव्यूहस्य प्रज्ञापारमितामुखस्य विषयः॥ आहैतन्मम कुलपुत्र समन्तव्यूहं प्रज्ञापारमितामुखपरिवर्तमभिमुखीकुर्वन्त्या उपनिध्यायन्त्या अनुसरन्त्या व्यवचारयन्त्या अनुविचिन्त्या आकारयन्त्या आधारयन्त्या व्यूहयन्त्या अभिनिर्हरन्त्याः समलंकुर्वन्त्याः प्रविचिन्त्याः समन्तमुखा नाम धारण्यांजायते। यत्र धारणीमण्डले दश धर्ममुखासंख्येयशतसहस्राण्यावर्तन्ते समवसरन्त्यामुखीभवन्ति। अभिपतन्ति परिवर्तन्ते। यदुत बुद्धक्षेत्रमुखं बुद्धमुखं धर्ममुखं सर्वसत्त्वमुखमतीतमुखमनागतमुखं प्रत्युत्पन्नमुखं स्थितकोटीमुखं पुण्यमुखं पुण्यसंभारमुखं ज्ञानमुखं ज्ञानसंभारमुखं प्रणिधानमुखं प्रणिधानविकल्पमुखं ^ चर्याविशुद्धिमुखं चर्यासमुदयमुखं चर्यापरिपूरिमुखं कर्ममुखं कर्मविरोधमुखं कर्मस्रोतमुखं कर्माभिसंस्कारमुखं कर्मविषयमुखं कर्मपरिवर्जनमुखं सम्यक्कर्मप्रतिपत्तिमुखं कर्मवशितामुखं सुचरितमुखं सुचरितसमादापनमुखं समाधिमुखं समाध्यनुचारमुखं समाधिविचारमुखं समाधिगोचरमुखं समाधिव्युत्थानमुखमभिज्ञामुखं चित्तसागरमुखं चित्तपर्यायमुखं चित्तलतापरिशुद्धिमुखं चित्तगहनावभासमुखं चित्तसरःप्रसादनमुखं चित्तसंभवमुखं चित्तविचारमुखं सत्त्वसंक्लेशप्रचारमुखं क्लेशवासनामुखं क्लेशप्रयोगमुखमधिमुक्तिमुखं सत्त्वचर्यामुखं सत्त्वचर्याविमात्रतामुखं लोकसंभवमुखं सत्त्वाशयमुखं सत्त्वसंज्ञागतमुखं दिङ्मुखं धर्मदिङ्मुखं महाकरुणामुखं महामैत्रीमुखं शान्तिमुखं वाक्पथमुखं नयमुखमनुगममुखं विभक्तिमुखं समवसरणमुखमसङ्गकोटीमुखं समन्तमुखं बुद्धधर्ममुखं बोधिसत्त्वधर्ममुखं श्रावकधर्ममुखं प्रत्येकबुद्धधर्ममुखं ^ लोकसंभवधर्ममुखं लोकविभवधर्ममुखं लोकसंस्थनधर्ममुखं लोकधातुविशुद्धिमुखं लोकधातुसंक्लिष्टमुखं संक्लिष्टविशुद्धिलोकधातुमुखं विशुद्धिसंक्लि=

चर्यामुखं    लोकधर्ममुखं

आर्यो बोधिसत्त्वानामववादानुशासनीं ददात्यनुशासनीमनुप्रयच्छति। तद्वदतु मे आर्यः कथं बोधिसत्त्वेन बोधिसत्त्वचर्यायां शिक्षितव्यं कथं प्रतिपत्तव्यम् ॥ स आह ॥ अहं कुलपुत्र दहरो जात्या नवकस्तु प्रव्रज्यया तेन मे कुलपुत्र एकजन्मना अष्टत्रिंशद्गङ्गानदीवालिकासमानां तथागतानामन्तिके ब्रह्मचर्यं चीर्णम्। क्वचिन्मे तथा रात्रिंदिवं ब्रह्मचर्यं चीर्णं क्वचित्सप्तरात्रिंदिवानि क्वचिदर्धमासं क्वचिन्मासं क्वचिद्वर्षं क्वचिद्वर्षशतं‸ क्वचिद्वर्षशतसहस्रं क्वचिद्वर्षकोटीं क्वचिद्वर्षकोटीनियुतं क्वचिद्यावदनभिलाप्यानभिलाप्यानि वर्षाणि क्वचिदन्तरकल्पं क्वचिदर्धकल्पं क्वचित्कल्पं क्वचिन्मे तथागते यावदनभिलाप्यानभिलाप्यान् कल्पान् ब्रह्मचर्यं चीर्णमनयैव कल्पसंख्यया ॥ सर्वेषामेव तथागतानामन्तिकाद्धर्मदेशना श्रुता। अववादानुशासनी संप्रतीच्छिता प्रणिधानव्यूहाः परिशोधिताः समुदागमविषयावतीर्णचर्यामण्डलं परिशोधितं पारमितासागरपरिपूरिताः। अभिसंबोधिविकुर्वितान्याज्ञातानि। धर्मचक्रप्रवर्तनानि चैषामन्योन्यासंभिन्नानि संधारितानि। बलसमता चैषामवतीर्णा। शासनं चैषां संधारितं यावत्सद्धर्मनिष्ठापर्यन्तं सर्वेषां च मे तेषां तथागतानां पूर्वप्रणिधानानि स्वबुद्धक्षेत्रपरिशुद्धये ऽभिनिर्हृतानि प्रणिधिमण्डलसमाध्यभिनिर्हारबलेन। सर्वेषां च मे तेषां पूर्वबोधिसत्त्वचर्या स्वचर्यापरिशुद्धये ऽभिनिर्हृता। सर्वचर्यावतारसमाधिप्रतिलम्भबलेन। सर्वेषां च मे तेषां तथागतानां पारमिताविशुद्धिरभिनिर्हृता समन्तभद्रचर्यानिर्याणबलेन ॥

अपि तु खलु पुनर्मे कुलपुत्रैवं चङ्क्रम्यमाणस्य सर्वदिक्स्रोतोमुखान्यावर्तन्ते सुविलोकितज्ञानमुखतया सर्वलोकधातुस्रोतोमुखानि व्यावर्तन्ते एकचित्तोत्पादेनानभिलाप्यानभिलाप्यलोकधात्वतिक्रमणपरिशोधनतायै। यदुत महाप्रणिधानाभिनिर्हारबलेन। एकचित्तक्षणेनानभिलाप्यानभिलाप्यसत्त्वचर्यानयमुखान्यभिमुखमावर्तन्ते दशबलज्ञानपरिपूरये। समन्तभद्रबोधिसत्त्वचर्याप्रणिध्यभिनिर्हारबलेन एकचित्तो-

‸ क्वचिद्वर्षसहस्रं

रणत्वादप्रतिकूलदर्शनानां सर्वाकुशलमूलनिष्यन्दसंभूतत्वादभिलषितदर्शनानां परमदुर्लभप्रादुर्भावत्वादुदुम्बरपुष्पसदृशानां चर्या ज्ञातुं गुणा वा वक्तुम् ॥

गच्छ कुलपुत्रेदमिहैव दक्षिणापथे श्रमणमण्डले जनपदे सुमुखं नाम नगरं तत्रेन्द्रियेश्वरो नाम दारकः प्रतिवसति। तमुपसंक्रम्य परिपृच्छ कथं बोधिसत्त्वेन बोधिसत्त्वचर्यायां शिक्षितव्यं कथं प्रतिपत्तव्यम्॥ अथ खलु सुधनः श्रेष्ठिदारको बोधिसत्त्वविक्रमप्रतिपद्विशुद्धिपरमः बोधिसत्त्वबलालोकावभासितचित्तोऽपराजितबोधिसत्त्ववैर्यामर्यादत्तहृदयो बोधिसत्त्वदृढप्रणिधिसंनाहासंकुचितचित्तो बोधिसत्त्वाशयदृढसंस्थानपरिणाहपरमो बोधिसत्त्वचर्यामेघसंधारणसंप्रस्थानाशयो बोधिसत्त्वधर्ममेघापरितृप्तसंतानः सर्वबोधिसत्त्वगुणावताराभिमुखप्रणिधानः सर्वजगत्सारथिसंग्राहकभूतमात्मानमुपनामयितुकामः सर्वजगन्महासंसाराटवीकान्तारादतिक्रामयितुकामः कल्याणमित्रदर्शनश्रवणपर्युपासनापरितृप्त एवाप्रमाणधर्मगौरवसंजातः सुदर्शनस्य भिक्षोः पादौ शिरसाभिवन्द्य सुदर्शनं भिक्षुमनेकशतसहस्रकृत्वः प्रदक्षिणीकृत्य पुनः पुनरवलोक्य सुदर्शनस्य भिक्षोरन्तिकात्प्रक्रान्तः ॥ १२ ॥

अथ खलु सुधनः श्रेष्ठिदारकस्तां सुदर्शनस्य भिक्षोरनुशासनीमनुमन्त्रयन् प्रवर्तयन्ननुप्रयच्छन् प्रविचिन्वन्प्रभाषमाणः प्रतिभावयन्नुदीरयन् दर्शयन्ननुविचिन्तयन्नभ्यवचरन् नयं विगमयन् तद्धर्मनयमनुविचारयन्नवभारयन् समवसरन्नावर्तयन् संभिन्दन् प्रदर्शयन्नवभासयन्ननुविलोकयन् देवनागयक्षगन्धर्वपरिवारोऽनुपूर्वेण येन श्रमणमण्डले जनपदे सुमुखं नगरं तेनोपसंक्रान्त इन्द्रियेश्वरं दारकं परिमार्गमाणस्तस्योपर्यन्तरिक्षेगता देवनागयक्षगन्धर्वा आरोचयन्त्येष कुलपुत्र इन्द्रियेश्वरो दारको नदीसंभेदाभ्यासे दशदारकसहस्रपरिवृतः पांशुक्रीडया क्रीडतीति ॥ अथ खलु सुधनः श्रेष्ठिदारको येन सुमुखं नगरं नदीसंभेदाभ्यासस्तेनोप=

लात्यन्तसमुद्घाटितत्वात्परमशूरदर्शनानां विपुलकुशलमू

कश्चित्सत्त्वस्तद्गृहमुपसंक्रामति यमसौ नाभिभूय तिष्ठति कायेन वा चित्ताधिपत्येन वा तेजसा वा वर्णेन वा श्रिया वा। ये च सत्त्वाः प्रभूतामुपासिकां पश्यन्ति देवा वा मनुष्या वा तेषां सर्वेषां प्रभूतायामुपासिकायां शास्तृसंज्ञा भवति। तस्मिंश्च गृहे दशासनकोटीसहस्राणि प्रज्ञप्तानि दिव्यमानुष्यसमतिक्रान्तानि बोधिसत्त्वकर्मविपाकपरिनिष्पन्नानि। न च तस्मिन् गृहे पश्यत्यान्नपाननिचयं वा वस्त्राभरणपरिभोगनिचयं वान्यत्रैकपिठरिकायाः पुरस्तान्निक्षिप्ताया दश चास्याः स्त्रीसहस्राणि पुरतः स्थितान्यपश्यदप्सरोवर्णान्यप्सरोरूपाण्यप्सरःकल्पान्यप्सरश्श्रेष्ठान्यप्सरःपरिभोगान्यप्सरउपचाराणि दिव्यकल्पदूष्यधाराणि दिव्यभूषणचरिताङ्गानि अप्सरोरुतमनोज्ञघोषाण्यप्सरःसमारोहपरिणाहानि ताः तस्याः स्त्रियः किंकरावचनप्रतिकारिण्यः पुरत उपतिष्ठन्त्युपविचरन्ति संप्रेक्षन्त उपनिध्यायन्ति अभिवन्दन्त आलोकयन्त्यवनमन्ति प्रणमन्ति नमस्यन्ति॥ तासां च गात्रेभ्यो यो गन्धः प्रवाति स तं सर्वं नगरमभिधूपयति। ये च सत्त्वास्तं गन्धं जिघ्रन्ति ते सर्वेऽव्यापन्नचित्ता भवन्त्यवैरचित्ता अविहिंसाचित्ता ईर्ष्यामात्सर्यविगतचित्ता अमायाशाठ्यचित्ता अनुनीता अप्रतिहतचित्ता अनवलीनानुन्नतचित्ताः समचित्ता मैत्रचित्ता हितचित्ताः संवरस्थचित्ताः परमपरिग्रहानभिलाषचित्ता भवन्ति। ये च तासां स्वरं शृण्वन्ति ते सर्वे प्रहर्षितप्रमुदितप्रणतचित्ता भवन्ति। ये च ताः पश्यन्ति ते विगतरागमात्मानं संजानाति॥

अथ खलु सुधनः श्रेष्ठिदारकः प्रभूताया उपासिकायाः पादौ शिरसाभिवन्द्य प्रभूतामुपासिकामनेकशतसहस्रकृत्वः प्रदक्षिणीकृत्य पुरतः प्राञ्जलीस्थित्वैवमाह॥ मयार्ये ऽनुत्तरायां सम्यक्संबोधौ चित्तमुत्पादितं न च जानामि कथं बोधिसत्त्वेन बोधिसत्त्वचर्यायां शिक्षितव्यं कथं प्रतिपत्तव्यम्। श्रुतं च मे आर्या बोधिसत्त्वानामववादानुशासनीं ददातीति। तद्वदतु मे आर्या कथं बोधिसत्त्वेन बोधिसत्त्वचर्यायां शिक्षितव्यं ^ ॥ आह॥ अहं कुलपुत्राक्षयव्यूहपुण्यकोशस्य

कथं प्रतिपत्तव्यम्

दक्षिणायां दक्षिणपश्चिमायां पश्चिमोत्तरायामधो दिशि ॥ ये केचित्कुलपुत्रोर्ध्वायां दिश्येकस्मिन् लोकधातावेकजातिप्रतिबद्धा बोधिसत्त्वाः सर्वे ते ममाहारं परिभुज्य बोधिमण्डे निषद्य ससैन्यं मारं पराजित्यानुत्तरां सम्यक्संबोधिमभिसंबुध्यन्ते ॥ यथोर्ध्वायां दिश्येकस्मिन् लोकधातावेवं ये लोकधातुशते लोकाधतुसहस्रे लोकधातुशतसहस्रे लोकधातुकोट्यां लोकधातुकोटीशते लोकधातुकोटीसहस्रे लोकधातुकोटीशतसहस्रे लोकधातुकोटीनियुतशतसहस्रे ये जम्बुद्वीपपरमाणुरजःसमेषु लोकधातुषु चातुर्द्वीपकलोकधातुपरमाणुरजःसमेषु साहस्रलोकधातुपरमाणुरजःसमेषु ^त्रिसाहस्रमहासाहस्रलोकधातुपरमाणुरजःसमेषु ये केचित्कुलपुत्रोर्ध्वायां दिशि यावदनभिलाप्यानभिलाप्यबुद्धक्षेत्रपरमाणुरजःसमेषु लोकधातुष्वेकजातिप्रतिबद्धा बोधिसत्त्वाः सर्वे ते ममाहारं परिभुज्य बोधिमण्डे निषद्य ससैन्यं मारं पराजित्यानुत्तरां सम्यक्संबोधिमभिसंबुध्यन्ते ॥

पश्यसि त्वं कुलपुत्रेमानि दश स्त्रीसहस्राणि मम परिवारम् ॥ आह ॥ पश्याम्यार्ये ॥ आह ॥ एतत्प्रमुखानि कुलपुत्र स्त्रीणां दशासंख्येयशतसहस्राणि मम सभागचरितान्येकप्रणिधानान्येककुशलमूलान्येकनिर्याणव्यूहान्येकाधिमुक्तिपथविशुद्धानि मम सभागस्मृतिविशुद्धानि सभागगतिविशुद्धानि सभागबुद्ध्यप्रमाणानि सभागेन्द्रियप्रतिलब्धानि सभागचित्तस्फरणानि सभागगोचरविषयाणि सभागधर्मनयावतीर्णानि सभागार्थविनिश्चितानि सभागधर्मार्थोद्योतनानि सभागरूपविशुद्धानि सभागबलाप्रमाणानि सभागवैर्यापराजितानि सभागधर्मरुतघोषाणि सभागस्वरविशुद्धानि सर्वव्यवहारेषु सभागगुणविशुद्धान्यप्रमाणगुणवर्णतया सभागकर्मविशुद्धान्यनवद्यकर्मविपाकविशुद्ध्या सभागमहामैत्रीस्फरणानि सर्वजगत्परित्राणतया सभागमहाकरुणास्फरणानि सर्वजगत्परिपाचनाखेदतया सभागकायकर्मविशुद्धानि यथाशयसर्वसत्त्वसंतोषणकायसंदर्शनतया सभागवाक्कर्मविशुद्धानि धर्मधातुनिरुक्तिव्यवहारेषु सभागोपसंक्रमणानि सर्वबुद्धपर्षन्मण्डलेषु सभागनिर्जवनानि सर्वबुद्धक्षेत्रेषु सर्व-

द्विसाहस्रलोकधातुपरमाणुरजःसमेषु

सर्वपुण्यसंभारैः कल्याणमित्रविवर्धितैरुपायकौशल्यचरितैरपरप्रत्ययेन कल्याणमित्रोपचारकौशल्येन विवर्धमानैः सर्वकुशलमूलैर्विशुध्यता बोधिसत्त्वाध्याशयेन संवर्धमानैर्बोधिसत्त्वेन्द्रियैः परिपाच्यमानैः सर्वकुशलमूलैः संवर्धमानैर्महाप्रणिधानाभिनिर्हारैर्विपुलीभवन्त्या महाकरुणया सर्वज्ञताया आसन्नीभूतमात्मानं संपश्यन् समन्तभद्रबोधिसत्त्वचर्यायाः सर्वबुद्धेभ्यो धर्मावभासं संप्रतीच्छन् विवर्धमानेन दशतथागतबलावभासेन विद्वांसं गृहपतिं परिगवेषमाणो ऽद्राक्षीन्मध्ये नगरस्य शृङ्गाटके सप्तरत्नव्योमकोपर्यसंख्येयरत्नमये विविधवज्रेन्द्रनीलरचितमणिरत्नपादे काञ्चनज्वालश्वेते विमलगर्भमणिरत्नगर्भे पञ्चरत्नशतसमलंकृतबिम्बविचित्रदिव्यदूष्यप्रज्ञप्त उच्छ्रितदिव्यपट्टध्वजपताकानेकरत्नजालसंछन्नमहारत्नवितानवितते महासुवर्णरत्नपुष्पदामाभिप्रलम्बिते भद्रासने निषण्णं विमलवैडूर्यदण्डेन जाम्बूनदकनकच्छत्रेण ध्रियतो हंसराजनिर्मलचमरसंवीज्यमानं विविधगन्धोपचारप्रधूपितं वामदक्षिणेन पञ्चभिस्तूर्यशतैः प्रवाद्यद्भिः दिव्यातिरेकमधुरनिर्घोषैर्महासंभवं नगरं पर्यापन्नः सत्त्वप्रीतिसंजननार्थं दिव्यकुसुमौघैः प्रवर्षद्भिर्दिव्यमानुष्यरूपसमतिक्रान्तैः परिनिष्पन्नबोधिसत्त्वाशयदिव्यातिरेकविभूषणसमलंकृतैः किंकरोपचरणप्रतिकारिभिः पूर्वकुशलमूलसभागचरितैर्दशभिः प्राणिसहस्रैः परिवृतं दृष्ट्वा च सुधनः श्रेष्ठिदारको येन विद्वान् गृहपतिस्तेनोपजगामोपेत्य विदुषो गृहपतेः पादौ शिरसाभिवन्द्य विद्वांसं गृहपतिमनेकशतसहस्रकृत्वः प्रदक्षिणीकृत्य पुरतःप्राञ्जलिः स्थित्वैवमाह ॥ अहमार्य सर्वसत्त्वानामर्थायानुत्तरां सम्यक्संबोधिं संप्रस्थितो यदुत सर्वसत्त्वदुःखव्युपशमाय सर्वसत्त्वात्यन्तसुखप्रतिष्ठापनाय सर्वसत्त्वसंसारसागराभ्युद्धारणतायै सर्वसत्त्वधर्मरत्नद्वीपसंप्रापणतायै सर्वसत्त्वतृष्णास्नेहोच्छोषणतायै सर्वसत्त्वानां महाकरुणास्नेहसंजननतायै सर्वसत्त्वानां कामरतितृष्णाविनिवर्तनतायै सर्वसत्त्वानां बुद्धज्ञानतृष्णोत्पादानतायै सर्वसत्त्वानां ∧ बुद्धगुणधर्मारामरतिसंजननतायै सर्वसत्त्वानां त्रैधातुकपुरान्नि=

संसाराटवीकान्तारसमतिक्रमणतायै सर्वसत्त्वानां

चूर्णार्थिभ्यश्चूर्णमाभरणविभूषणार्थिभ्य आभरणविभूषणानि रत्नार्थिभ्यो रत्नानि सुवर्णार्थिभ्यः सुवर्णं रूप्यार्थिभ्यो रूप्यं मुक्तार्थिभ्यो मुक्तां प्रतिश्रयार्थिभ्यः प्रतिश्रयं आसनार्थिभ्य आसनं शयनार्थिभ्यः शयनं ग्लानप्रत्ययभैषज्यपरिष्कारार्थिभ्यो ग्लानप्रत्ययभैषज्यपरिष्कारान् यानार्थिभ्यो यानं वाहनार्थिभ्यो वाहनं हस्त्यश्वरथगोगर्दभमहिषैडकार्थिभ्यो हस्त्यश्वरथगोगर्दभमहिषैडकाञ्छत्रध्वजपताकार्थिभ्यश्छत्रध्वजपताका दासीदासार्थिभ्यो दासीदासा माणवपरिवारार्थिभ्यो माणवपरिवारं स्त्र्यर्थिभ्यः स्त्रियः कुमार्यर्थिभ्यः कुमारीं मकुटचूडामण्यर्थिभ्यो मकुटचूडामणीन्, नीलविमलकेशमण्डलार्थिभ्यो नीलविमलकेशमण्डलं यावद्विविधसर्वोपकरणार्थिभ्यो विविधसर्वोपकरणानि प्रयच्छामि । आगमय कुलपुत्र मुहूर्तं यावत्प्रत्यक्षो भविष्यसि । समनन्तरभाषितायां चास्यां वाचि विदुषा गृहपतिनाथ तावदेवापरिमाणाः सत्त्वा विदुषा गृहपतिना पूर्वप्रणिधानाभिनिमन्त्रिताः संनिपतिताः । नानादिग्भ्यो नानाजनपदप्रदेशेभ्यो नानानगरेभ्यो नानानिगमेभ्यो नानापट्टनेभ्यो नानाकर्वटेभ्यो नानासत्त्वजातिभ्यो नानासत्त्वकुलेभ्यो नानासत्त्वकुलविमात्रताभ्यो नानागतिपरिवर्तेभ्यो नानाप्रतिष्ठानसंज्ञानगतिभ्यो नानायतनविशुद्धा नानाहारार्थिनो नानाहाराभिलाषिणो नानाशयाशुच्यन्नपानकामा मांसार्थिनो विविधभोजनविमात्रताभिकाङ्क्षिणो विविधगतिविशेषोपपत्त्यायतनस्थिताः । यदुत मनुष्येष्वोदनकुल्माषसूपमत्स्यमांसादिविविधकवडीकाहारार्थिनो यथा मनुष्येष्वेवं सर्वगतिविचारेषु नानाभोजनपानार्थिन उपसंक्रान्ता यदुत बोधिसत्त्वानुभावेनासङ्गत्यागदुन्दुभिनिर्घोषेण बोधिसत्त्वप्रणिधिनिमन्त्रितास्तमुपसंक्रम्य विद्वांसं गृहपतिं याचन्ते ऽवलोकयन्ति निरीक्षन्ते विज्ञापयन्ति ॥

अथ खलु विद्वान् गृहपतिस्तान् याचनकान् संनिपतितान् विदित्वा मुहूर्तमनुविचिन्त्य गगनतलमवलोकयति स्म ॥ तस्य ततो गगनतलाद्विविधा भोजनपानविधयो नानारसा नानावर्णा नानागन्धा अवलम्ब्य हस्ततले प्रत्यतिष्ठन् ॥ स तान्यादाय तान्यथासंनिपतितान्याचनकान् नानाधि=

सचर्मचूडामण्यर्थिभ्यो सचर्मचूडामणीन्

निध्यपयति। समनन्तरसमापन्नायां चाचलायामुपासिकायामपश्यत्सुधनः श्रेष्ठिदारको दशसु दिक्षु दशबुद्धक्षेत्रानभिलाप्यपरमाणुरजःसमान् लोकधातून् षड्विकारं प्रकम्प्यमानान् परिशुद्धवैडूर्यमयान् संस्थितानेकैकस्मिंश्च लोकधातौ कोटीशते चतुर्महाद्वीपकानां लोकधातूनां कोटीशतं तथागतानामपश्यत्। कांश्चित्तुषितवरभवनगतान् कांश्चिद्यावत्परिनिर्वायमाणानपश्यत्। यदुतानावरणत्वात्परिशुद्धवैडूर्यमयलोकधातूनामेकैकं च तथागतं सर्वधर्मधातुस्फरणरश्मिजालप्रभामण्डलमेकैकं च तथागतं सुविभक्तपर्षन्मण्डलसमुद्रमपश्यदेकैकस्य च तथागतस्य सर्वधर्मचक्रोद्योतनं सर्वसत्त्वश्रोत्रविज्ञपनं स्वरमण्डलमश्रौषीत्॥

अथ खल्वचलोपासिका ततः समाधेर्व्युत्थाय सुधनं श्रेष्ठिदारकमेवमाह॥ दृष्टं ते कुलपुत्र श्रुतं विज्ञातम्॥ आह॥ दृष्टमार्ये श्रुतं विज्ञातम्॥ आह॥ एवमहं कुलपुत्र दृढसमादानायां बोधिसत्त्वचर्यायामनुशिक्षमाणा सर्वधर्मपर्येष्ट्यपरिखेदव्यूहसमाधिसमापन्ना दुर्योधनज्ञानगर्भबोधिसत्त्वविमोक्षमुखप्रतिष्ठिता सर्वधर्मसमताभूमिधारण्यनुगमेन सर्वधर्मतलोद्योतनप्रतिभानज्ञानालोककौशल्येन सर्वसत्त्वान् सुभाषितेन संतोषयामि॥ किं मया शक्यमचिन्त्याप्रमेयगुणसमन्वागतानां बोधिसत्त्वानां चर्या ज्ञातुं गुणा वा वक्तुम्॥ ये ते द्विजर्षभा इव गगनतले ऽनिकेतचारिणः। ये ते महागरुडेन्द्रा इव सत्त्वसागरमवगाहन्ते परिपक्वबोधिसत्त्वोद्धरणतायै। ये ते वणिज इव सर्वज्ञतारत्नद्वीपे ऽनुविचरन्ति दशबलज्ञानरत्नाभिकाङ्क्षिणः। ये ते बलवत्कैवर्ता इव संसारसागरे ऽनुविचरन्ति रुचिरधर्मचक्रमण्डलजालातृष्णाम्बूद्भवसत्त्वपरिपाचनात्युद्धरणतायै। ^ ये ते दिनकरमण्डलमिव धर्मधातुगगनतले समुदागच्छन्ति सत्त्वतृष्णासलिलक्लेशपङ्कोच्छोषणतायै। ये ते पूर्णचन्द्रमण्डलमिव ज्ञाननभस्युदागच्छन्ति विनेयमनःकुमुदविबोधनतायै। ये ते धरणितलमिवानुनयप्रतिघोन्नामावनामविषमे समे लोके संतिष्ठन्ते सर्वजगत्कुशलेन्द्रियाङ्कुरप्ररोहणविवर्धनतायै। ये ते मारुत इवासङ्गसर्वदिग्विचारिणः

ये ते ऽसुरेन्द्रा इव त्रिभुवनपुरं स्फरित्वा विचरन्ति क्लेशासुरसंक्षोभाद्भुतसंशमनतायै

वन्द्य तमनेकशतसहस्रकृत्वः प्रदक्षिणीकृत्य पुरतः प्राञ्जलिः स्थित्वैवमाह ॥ मयार्यानुत्तरायां सम्यक्संबोधौ चित्तमुत्पादितं न च जानामि कथं बोधिसत्त्वेन बोधिसत्त्वचर्यायां शिक्षितव्यं कथं प्रतिपत्तव्यम् ।^

आह ॥ साधु साधु कुलपुत्र यत्त्वमनुत्तरां सम्यक्संबोधिमभिसंप्रस्थितः । अहं कुलपुत्र सर्वगामी सर्वत्रानुगतायां बोधिसत्त्वचर्यायां स्थितः समन्तमुखव्यवचारणालोकेन समाधिमुखेनाभावप्रतिष्ठितयार्यानभिसंस्कारिकया समन्तधर्मधातुतलभेदेन च प्रज्ञापारमिताज्ञानालोकमुखेन समन्वागतः । सो ऽहं कुलपुत्र सर्वसत्त्वभाजनालोकव्यवचारेषु सर्वसत्त्वगतिव्यवचारेषु सर्वसत्त्वच्युतिमुखेषु सर्वसत्त्वोपपत्तिमुखेषु सर्वभवगतिसंभेदेषु विविधोपपत्त्यायतनविचित्रलोकसंनिवेशे विचित्रवर्णसंस्थानारोहपरिणाहानां सत्त्वानां नानाविधोपपत्तिसंयोजनानां नानाप्रयोगानां विचित्राधिमुक्तानां यदुत देवगतिपर्यापन्नानां नागगतिपर्यापन्नानां यक्षगतिपर्यापन्नानां गन्धर्वगतिपर्यापन्नानामसुरगतिपर्यापन्नानां गरुडगतिपर्यापन्नानां किंनरगतिपर्यापन्नानां महोरगगतिपर्यापन्नानां नरकगतिपर्यापन्नानां तिर्यग्योनिगतिपर्यापन्नानां यमलोकगतिपर्यापन्नानां मनुष्यगतिपर्यापन्नानाममनुष्यगतिपर्यापन्नानां विविधदृष्टिगतिनिश्रितानां श्रावकयानाधिमुक्तानां प्रत्येकबुद्धयानाधिमुक्तानां महायानाधिमुक्तानां सत्त्वानामर्थं करोमि विविधैरुपायैर्विविधैर्ज्ञाननयप्रयोगैर्यदुत केषांचित्सत्त्वानां विविधलौकिकशिल्पशिक्षणतयार्थं करोमि सर्वशिल्पज्ञानभेदवतीधारण्यालोकेन। केषांचित्सत्त्वानां चतुःसंग्रहवस्तुप्रयोगेणार्थं करोमि यदुत सर्वज्ञज्ञानोपनयनाय । केषांचित्सत्त्वानां पारमितासंवर्णनतयार्थं करोमि यदुत सर्वज्ञतापरिणामज्ञाननयालोकसंजननतया । केषांचित्सत्त्वानां बोधिचित्तसंवर्णनतयार्थं करोमि यदुत बोधिबीजाविप्रणाशोपस्तम्भसंजननतया । केषांचित्सत्त्वानां सर्वाकारबोधिसत्त्वचर्यासंवर्णनतयार्थं करोमि यदुत सर्वबुद्धक्षेत्रपरिशोधनसर्वसत्त्वपरिपाकप्रणिधिसंजननतायै । केषांचित्सत्त्वानामुद्वेगसंजननतयार्थं करोमि यदुत दुश्चरित-

श्रुतं च मे आर्यो बोधिसत्त्वानामववादानुशासनीं ददातीति । तद्वदतु मे आर्यः कथं बोधिसत्त्वेन बोधिसत्त्वचर्यायां शिक्षितव्यं कथं प्रतिपत्तव्यम् ॥

विपाकनिष्यन्दनरकगतिदुःखवेदनानुभवसंदर्शनतया । केषांचित्सत्त्वानां महाप्रीतिसंजननतयार्थं करोमि यदुत सर्वतथागतावरोपितदक्षिणानियतसर्वज्ञताफलपर्यवसानेऽभ्युदीरणतया । केषांचित्सत्त्वानां सर्वतथागतगुणवर्णसंप्रकाशनतयार्थं करोमि यदुत बुद्धगुणशरीराभिलाषसर्वज्ञताप्रणिधिसंजननतायै । केषांचित्सत्त्वानां बुद्धमाहात्म्यसूचनार्थं करोमि यदुत विवर्त्यानां भोगाप्रतिप्रश्रब्धबुद्धकार्यानुष्ठानसक्तबुद्धकायप्रतिलम्भाभिलाषसंजननतायै । केषांचित्सत्त्वानां बुद्धाधिपतेयतासंदर्शनतयार्थं करोमि यदुतानभिभूतबुद्धात्मभावसंपत्प्रतिलाभाभिलाषसंजननतायै ॥

अपि तु खलु पुनरहं कुलपुत्रेह नगरे तोसले सर्वरथ्यासु सर्वचत्वरेषु सर्वशृङ्गाटकेषु सर्ववीथीमुखेषु सर्वगृहेषु सर्वश्रेणिषु सर्वकुलेषु सर्वकुलपरिवर्तेषु यथा संनिपतितानां स्त्रीपुरुषदारकदारिकाणां यथाशयानां यथाप्रयोगानां यथाधिपतेयानां यथाव्यवचारिणां तत्सभागान्यात्मभावारोहपरिणाहसंस्थानान्यभिनिर्हृत्य धर्मं देशयामि । न च ते सत्त्वा अवबुध्यन्ते केनेदं देशितं कुतो वायमित्यन्यत्र श्रुत्वा तथत्वाय प्रतिपद्यन्ते । येऽपीमे कुलपुत्र जम्बुद्वीपे षण्णवतियो पाषण्डा विविधदृष्टिगताभिनिविष्टास्तत्राप्यहं सर्वत्रागच्छामि विविधदृष्टिगतसक्तानां सत्त्वानां परिपाचनतायै । यथा च कुलपुत्राहमिह तोसले नगरे सत्त्वानामर्थं करोम्येवं जम्बुद्वीपे सर्वग्रामनगरनिगमजनपदराष्ट्रराजधानीषु सत्त्वानामर्थं करोमि ॥ यथा जम्बुद्वीपे तथा सर्वत्र चातुर्द्वीपके लोकधातावेवं साहस्रे द्विसाहस्रे त्रिसाहस्रे महासाहस्रे लोकधातावेवं दशसु दिक्ष्वपरिमाणेषु लोकधातुषु सर्वसत्त्वपथेषु सर्वसत्त्वप्रतिष्ठानेषु सर्वसत्त्वनिकेतेषु सर्वसत्त्वनिलयसंज्ञागतेषु सर्वसत्त्वपरिवर्तेषु सर्वसत्त्वसमवसरणेषु सर्वसत्त्वसमुद्रेषु सर्वसत्त्ववंशेषु सर्वसत्त्वदिक्षु ^ सर्वसत्त्वविधिषु यथाशयाधिमुक्तानां सत्त्वानामर्थं करोमि । विविधैरुपायैर्विविधैर्नयैर्विविधैर्द्वारैर्विविधाभियुक्तिभिर्विविधैः प्रसंगैर्विविधैरुपायनयैर्विविधाभिः क्रियाभिर्विविधरूपवर्णसंदर्शनसंप्रसादनतया विविधवाक्पथोदीरणतया सत्त्वानामर्थं करोमि ॥

सर्वसत्त्वविदिक्षु

नामि सर्वभूतान्तरायव्युपशमनानि प्रजानामि। सर्वावर्तसंभवं सर्वावर्तपरिवर्जनं महोर्मिवेगपरिहारपरिवर्तनं रात्रिंदिवक्षणलवमुहूर्तं प्रजानामि। गमनागमनावेगषतां क्षेमाक्षेमतां यानपात्रयन्त्रक्रियादृढतां यानपरिहारं यानवाहनं मारुतसंग्रहणं मारुतोत्पादनं यानावर्तनं यानपरिवर्तनं यानसंस्थापनं यानसंप्रेषणं प्रजानामि॥ सो ऽहं कुलपुत्रैवं ज्ञानसमन्वागतः सततं सत्त्वार्थकायप्रयुक्तो वणिग्गणं दृढेन यानेन क्षेमेण शिवेनाभयेन यथाप्रहर्षं प्रमोदयन् धार्म्या कथया यथाभिप्रायेण रत्नद्वीपमुपनयामि। सर्वरत्नसमृद्धिं चैषां कृत्वा पुनर्जम्बुद्वीपमुपनयामि। न च मम कुलपुत्र कदाचित्किंचिद्यानपात्रं विपन्नपूर्वं येषां च सत्त्वानामहं कुलपुत्र चक्षुषामाभसमागच्छामि। ये च सत्त्वा मम धर्मदेशनां शृण्वन्ति तेषां सर्वसंसारसंसीदनभयानि विगच्छन्ति सर्वज्ञतासागरावतारज्ञानं चामुखीभवन्ति तृष्णासागरोच्छोषणतायै च प्रतिपद्यन्ते त्र्यध्वसागरज्ञानालोकं च प्रतिलभन्ते सर्वसत्त्वदुःखसागरक्षयाय चाभ्युत्सहन्ते सर्वसत्त्वचित्तसागरकालुष्यप्रसादनतायै च प्रयुज्यन्ते सर्वक्षेत्रसागरविशुद्धये वीर्यमारभन्ते। सर्वदिक्सागरस्फरणतायै च न विनिवर्तन्ते सर्वजगदिन्द्रियसागरसंभेदं च प्रतिविध्यन्ति सर्वसत्त्वचर्यासागरं चानुवर्तन्ते यथाशयजगत्सागरप्रतिभासप्राप्ताश्च भवन्ति॥

एतस्याहं कुलपुत्र महाकरुणाध्वजस्यामोघदर्शनश्रवणं संवासानुस्मृतिनामनदीनिर्घोषस्य बोधिसत्त्वविमोक्षस्य लाभी॥ किं मया शक्यं बोधिसत्त्वानां सर्वसंसारसागरविचारिणां सर्वक्लेशसागरानुपलिप्तानां सर्वदृष्टिगतसागरसंग्रहग्राहभयविगतानां सर्वधर्मसागरस्वभावजालविचारिणां सर्वजगत्सागरस्वभावतलविचारिणां सर्वजगत्सागरसंग्रहवस्तुसंग्रहणजालानां सर्वज्ञतासागरसंवासिनां सर्वसत्त्वाभिनिवेशसागरनिर्मथानां सर्वकालसागरसंभिन्नविहारिणां सर्वजगत्सागरपरिपाकसत्त्वाभिज्ञानां सर्वजगत्सागरविनयकालानतिक्रान्तानां चर्या ज्ञातुं गुणा वा वक्तुम्॥

मुदकवर्णविमात्रतां प्रजानामि चन्द्रादित्यज्योतिर्ग्रहगण

निगमजनपदराष्ट्रराजधानीषु सर्वकामधात्वन्तर्गतासु सर्वसत्त्वगतिषु धर्मं देशयाम्यधर्मं प्रतिजहामि विवादं प्रशमयामि विग्रहं व्यावर्तयामि कलहं व्युपशमयामि युद्धं विनिवारयामि रणमुपशमयामि वैरमुपरमयामि बन्धनानि छिनद्मि चारकानि भिनद्मि भयानि विनिवर्तयामि । अकुशलकर्माभिसंस्कारान् समुच्छिनद्मि प्राणिवधात्सत्त्वान् विनिवारयामि । अदत्तादानात्काममिथ्याचारान्मृषावादात्पैशुन्यात्पारुष्यात्संभिन्नप्रलापादभिध्याया व्यापादान्मिथ्यादृष्टेः सत्त्वान्निवारयामि सर्वकार्येभ्यः सत्त्वान् विनिवारयामि सर्वधर्मकुशलधर्मक्रियास्वनुवर्तयामि सर्वसत्त्वान् सर्वशिल्पानि शिक्षयामि लोकहितावहानि सर्वशास्त्राणि द्योतयामि प्रकल्पायामि प्रकाशयामि प्रभावयामि लोकप्रहर्षणतायै सत्त्वपरिपाकाय सर्वपाषण्डाननुवर्ताम्युत्तरि ज्ञानविशेषसूचनतायै सर्वदृष्टिगतविनिवर्तनतायै सर्वबुद्धधर्मारोचनतायै यावद्ब्रह्मलोके ऽपि सर्वरूपधातुकान् देवानभिभूय धर्मं देशयामि । यथा चेह त्रिसाहस्रमहासाहस्रे लोकधातौ तथा दशसु दिक्षु दशानभिलाप्यबुद्धक्षेत्रकोटीनियुतशतसहस्रपरमाणुरजःसमेषु लोकधातुषु धर्मं देशयामि । बुद्धधर्मान् देशयामि बोधिसत्त्वधर्मान् श्रावकधर्मान् प्रत्येकबुद्धधर्मान् देशयामि ।^[1] नरकगामिनीं प्रतिपदं देशयामि नैरयिकसत्त्वकारणां देशयामि तिर्यग्योनिं देशयामि तिर्यग्योनिगतिसंभेदं तिर्यग्योनिगतिगामिनीं प्रतिपदं तिर्यग्योन्युपपत्तिदुःखं देशयामि यमलोकं देशयामि यमलोकगामिनीं प्रतिपदं यमलोकदुःखं देशयामि । स्वर्गलोकं देशयामि स्वर्गलोकगामिनीं प्रतिपदं स्वर्गलोकरत्युपचारपरिभोगं देशयामि । मनुष्यलोकं देशयामि मनुष्यलोकगतिगामिनीं प्रतिपदं मनुष्यलोकसुखदुःखानुभववैचित्र्यं देशयामि ॥

इति हि कुलपुत्र लोकधर्मं देशयामि लोकसमुदयं लोकास्तंगमनं लोकादीनवं लोकनिःसरणमपि देशयामि । यदुत बोधिसत्त्वमार्गसंप्रकाशनतायै संसारदोषविनिवर्तनतायै सर्वज्ञतागुणसंदर्शनतायै

[1] नरकान्देशयामि

नरराजप्रमुखानां किंनरेन्द्राणां सकिंनरकन्याकिंनरकुमारपरिवाराणां संनिषण्णानां सिंहविजृम्भितां भिक्षुणीं बुद्धचर्यावभासं नाम धर्ममुखं संप्रकाशयमानामपश्यत् ॥ क्वचिदासनपरिवारे भृकुटीमुखमहोरगेन्द्रप्रमुखानां महोरगेन्द्राणां समहोरगकन्यामहोरगकुमारपरिवाराणां संनिषण्णानां सिंहविजृम्भितां भिक्षुणीं बुद्धप्रीतिसंभवं नाम धर्ममुखं संप्रकाशयमानामपश्यत् ॥ क्वचिदासनपरिवारेऽनेकेषां स्त्रीपुरुषदारकदारिकाशतसहस्राणां संनिषण्णानां सिंहविजृम्भितां भिक्षुणीं ज्ञानविशेषगमनं नाम धर्ममुखं संप्रकाशयमानामपश्यत् ॥ क्वचिदासनपरिवारे नित्यौजोहरद्रुमराजराक्षसेन्द्रप्रमुखानां राक्षसेन्द्राणां सराक्षसकन्याराक्षसकुमारपरिवाराणां संनिषण्णानां सिंहविजृम्भितां भिक्षुणीं कृपासंभवं नाम धर्ममुखं संप्रकाशयमानामपश्यत् ॥ क्वचिदासनपरिवारे श्रावकयानाधिमुक्तानां सत्त्वानां संनिषण्णानां सिंहविजृम्भितां भिक्षुणीं ज्ञानविशेषप्रभावं नाम धर्ममुखं संप्रकाशयमानामपश्यत् ॥ क्वचिदासनपरिवारे प्रत्येकबुद्धयानाधिमुक्तानां सत्त्वानां संनिषण्णानां सिंहविजृम्भितां भिक्षुणीमुदारबुद्धगुणावभासं नाम धर्ममुखं संप्रकाशयमानामपश्यत् ॥ क्वचिदासनपरिवारे महायानाधिमुक्तानां सत्त्वानां संनिषण्णानां सिंहविजृम्भितां भिक्षुणीं समन्तमुखं नाम समाधिज्ञानालोकमुखं संप्रकाशयमानामपश्यत् ॥ क्वचिदासनपरिवारे प्रथमचित्तोत्पादिकानां बोधिसत्त्वानां संनिषण्णानां सिंहविजृम्भितां भिक्षुणीं सर्वबुद्धप्रणिधिकूटं नाम समाधिमुखं संप्रकाशयमानामपश्यत् ॥ क्वचिदासनपरिवारे द्वितीयभूमिप्रतिष्ठितानां बोधिसत्त्वानां सिंहविजृम्भितां भिक्षुणीं विरजोमण्डलं नाम समाधिमुखं संप्रकाशयमानामपश्यत् ॥ क्वचिदासनपरिवारे तृतीयभूमिप्रतिष्ठितानां बोधिसत्त्वानां संनिषण्णानां सिंहविजृम्भितां भिक्षुणीं प्रशान्तव्यूहं नाम समाधिमुखं संप्रकाशयमानामपश्यत् ॥ क्वचिदासनपरिवारे चतुर्थीभूमिप्रतिष्ठितानां बोधिसत्त्वानां संनिषण्णानां सिंहविजृम्भितां भिक्षुणीं सर्वज्ञतावेगविषयसंभवं नाम समाधिमुखं संप्रकाश=

ज्ञेयमेतत्कुलपुत्र स्थानं सदेवमानुषासुरेण लोकेन सश्रमणब्राह्मणिका=
याः प्रजायाः । यदुत बोधिसत्त्वपराक्रमी बोधिसत्त्ववीर्यानिवर्त्यता बो=
धिसत्त्ववीर्यसंहार्यतां नेदं कुलपुत्र शक्यं कल्याणमित्रापरिगृहीतैर्बुद्धास=
मन्वाहृतैरनुपचितकुशलमूलैरपरिशुद्धाशयैरप्रतिलब्धबोधिसत्त्वेन्द्रियैः प्र=
ज्ञाचक्षुविरहितैः श्रोतुं वा संधारयितुं वाधिमुक्तुं वावतरितुं वा ॥ आह ॥
वदतु मे आर्यो ऽधिमोक्ष्यामि श्रद्धास्यामि बुद्धानुभावेन कल्याणमित्र-
परिग्रहेण च ॥ सो ऽवोचदहं कुलपुत्र पूर्वस्यां दिशः श्रीगर्भवत्यो लो=
कधातोरागच्छामि समन्तश्रीसंभवस्य तथागतस्य बुद्धक्षेत्रात् । तस्य मे कु=
लपुत्र समन्तश्रीसंभवस्य तथागतस्य पादमूलादेष समन्तमुखनिर्जवनो बोधि-
सत्त्वविमोक्षः प्रतिलब्धः । ततश्च मे कुलपुत्र श्रीगर्भवत्यो लोकधातोरु=
च्चलितस्यानभिलाप्यानभिलाप्यबुद्धक्षेत्रपरमाणुरजःसमाः कल्पाः क्षीणाः ।
एकैकेन च चित्तोत्पादेनानभिलाप्यानभिलाप्यबुद्धक्षेत्रपरमाणुरजःसमान्
पदव्यवहारान् व्यतिक्रमामि । एकैकेन च पदव्यवहारेणानभिलाप्यान=
भिलाप्यबुद्धक्षेत्रपरमाणुरजःसमानि बुद्धक्षेत्राण्यतिक्रमामि । सर्वाणि च
तानि बुद्धक्षेत्राण्यविरहितानि तथागतैरवतरामि । सर्वांश्च तान् बुद्धान्
भगवतो ऽनुत्तरया मनोमय्यानभिसंस्कारधर्मधातुमुद्रामुद्रितया तथागता=
नुज्ञातया सर्वबोधिसत्त्वप्रहर्षसंजनन्या तथागतं पूजयामि । यावतश्च
तेषु लोकधातुषु सत्त्वसमुद्रान् पश्यामि । सर्वेषां च तेषां चित्तसागरा-
नवतरामि । सर्वेषां च तेषामिन्द्रियचक्रं परिज्ञाय यथाशयाधिमुक्तितो
रूपकायं संदर्शयामि धर्मघोषमुदीरयामि प्रभामण्डलमुत्सृजामि विवि=
धोपकरणसंपदमुपसंहरामि स्वकायं चैषामधितिष्ठामि । यदुत परिपा=
कविनयप्रयोगाप्रतिप्रश्रब्धये यथा च पूर्वस्यां दिशो निर्याम्येवं दक्षिणा=
याः पश्चिमाया उत्तराया उत्तरपूर्वायाः पूर्वदक्षिणाया दक्षिणपश्चिमा=
याः पश्चिमोत्तराया अध ऊर्ध्वाया दिशो निर्यामि ॥

एतमहं कुलपुत्र समन्तमुखनिर्जवनं बोधिसत्त्वविमोक्षं जाना=
मि ॥ किं मया शक्यं सर्वत्रानुगतानां बोधिसत्त्वानां समतादिगभिमु=

अहं कुलपुत्र सर्वसत्त्वतमोविकिरणधर्मावभासजगद्विनयमुखस्य बोधिसत्त्वविमोक्षस्य लाभिनी। विषममतिषु सत्त्वेषु मैत्रचित्ता। अकुशलकर्मपथप्रतिपन्नेषु ^मुदितचित्ता। समविषममतिषु सत्त्वेषूपेक्षचित्ता। संक्लिष्टेषु विशोधनचित्ता। विषमगतेषु सम्यक्प्रतिपन्नचित्ता। हीनाधिमुक्तिकेषूदाराधिमुक्तिसंजननचित्ता। हीनेन्द्रियेषु महावीर्यवेगविवर्धनचित्ता। संसाराभिरतेषु संसारगतिचक्रविनिवर्तनचित्ता। श्रावकप्रत्येकबुद्धयानाभिमुखेषु सत्त्वेषु सर्वज्ञतामार्गप्रतिष्ठापनचित्ता॥ एवं चित्तमनसिकारप्रयुक्ता खलु पुनरहं कुलपुत्रानेन सर्वसत्त्वतमोविकिरणधर्मावभासजगद्विनयमुखेन बोधिसत्त्वविमोक्षेण समन्वागता॥

ये सत्त्वा अन्धकारतमिस्रायां रात्रौ परिक्रान्तेषु मनुष्येषु भूतसंघानुचरितायां तस्करगणसंकीर्णायां विषमचारिसत्त्वदिक्करितायां कालाभ्रमेघजालसंछन्नायां धूमरजोमलसमाकुलायां विषमवातवृष्टिसंक्षोभितायां चन्द्रादित्यज्योतिर्गणरहितायां चक्षुष्कार्याप्रराक्रमायां रात्रौ सागरगता भवन्ति स्थलगता वा पर्वतगता वा अटवीकान्तारगता वा वनान्तरगता वा देशान्तरगता वा ग्रामान्तरगता वा दिगन्तरगता वा विदिगन्तरगता वा मार्गान्तरगता वा महासागरगता वा विपन्नयानयात्रा भवन्ति। स्थलगता वा विहन्यन्ते। पर्वतगता वा महाप्रपातेषु प्रपतन्ति। महाटवीकान्तारगता वान्नपानविरहिता भवन्ति। वनगहनवेत्रजालैरवसक्ता वा नयव्यसनमापद्यन्ते। देशान्तरगता वा तस्करैर्हन्यन्ते। ग्रामान्तरगता वा विषमचारित्रा विनश्यन्ति। दिगन्तरगता वा संमुह्यन्ति विदिगन्तरगता वा विमुह्यन्ति मार्गान्तरगता वा विलयमापद्यन्ते। तेषामहं कुलपुत्र सत्त्वानां नानोपायमुखैर्लयनभूता भवामि। यदुत सागरगतानां कालिकावातमेघविकिरणतायै कलुषोदकातिक्रमणतायै विषमवातमण्डलीविकिरणतायै महोर्मिवेगव्युपशमनतायै आवर्तभयविमोचनतायै दिगुद्योतनतायै सम्यगुदकपथप्रतिपादनतायै तीरदर्शनतायै रत्नद्वीपोपनयनाय मार्गं संदर्शयामि। संग्राहकरूपेण सार्थ-

करुणाचित्ता कुशलकर्मपथप्रतिपन्नेषु

गत्यानुगच्छामि अध्वविपुलया बुद्ध्या स्फरामि तथागतसमतानुगामिन्या प्रज्ञया सामीकरोमि ॥

सर्वधर्मनयानभिनिर्हरामि । सर्वधर्ममेघेषु सूत्रान्तमेघानभिनिर्हरामि सर्वसूत्रान्तमेघेषु धर्मसमुद्रान् परिसंस्थापयामि सर्वधर्मसमुद्रेषु धर्मपरिवर्तान् समवसरामि सर्वधर्मपरिवर्तेषु धर्ममेघान् संजाने सर्वधर्ममेघेषु धर्मोर्मीन् संजनयामि सर्वधर्मोर्मिषु धर्मप्रीतिवेगसागरान् प्रतिलभे सर्वधर्मप्रीतिवेगसागरेषु भूमिप्रतिलम्भवेगानभिनिर्हरामि सर्वभूमिवेगेषु समाधिसमुद्रमेघेषु बुद्धदर्शनसमुद्रान् प्रतिलभे सर्वबुद्धदर्शनसमुद्रेष्ववभाससमुद्रान् प्रतिलभे । सर्वावभाससमुद्रेषु अध्वज्ञानमण्डलभूमीः परिसंस्थापयामि । अनन्तमध्यदिक्सागरस्फरणयोगेन । अप्रमेयतथागतपूर्वान्तचर्यासमुद्रावतरणयोगेन । अप्रमेयतथागतपूर्वयोगसमुद्रज्ञानावभासयोगेन । अप्रमेयतथागतज्ञानालोकप्रतिलम्भयोगेन । अप्रमेयतथागतशीलपरिशुद्ध्यवभासयोगेन । अप्रमेयतथागतक्षान्तिभूमिपरिशोधनयोगेन । अप्रमेयतथागतमहावीर्यवेगविवर्धनविक्रमज्ञानावभासप्रतिलम्भयोगेन । अप्रमेयतथागतध्यानमण्डलध्यानागमसमुद्रपरिशुद्धिप्रयोगावभासप्रतिलम्भयोगेन । अप्रमेयतथागतप्रज्ञापारमितानयसागरपरिशुद्धिविज्ञप्त्यवभासयोगेन । अप्रमेयतथागतोपायकौशल्यपारमितानयसमुद्रावतरणयोगेन । अप्रमेयतथागतप्रणिधानपारमितानयसमुद्रावतरणयोगेन । अप्रमेयतथागतपुण्यज्ञानबलपारमितासंवर्धनसंवसनज्ञानप्रतिलम्भयोगेन । अप्रमेयतथागतज्ञानपारमितानयसागरविचारप्रतिलम्भयोगेन । अप्रमेयतथागतपूर्वबोधिसत्त्वभूम्याक्रमणज्ञानावभासप्रतिलम्भयोगेन । अप्रमेयतथागतभूम्याक्रमणसंधिविकुर्वितकल्पसागरसंवसनयोगेन । अप्रमेयतथागतपूर्वबोधिसत्त्वभूमिमण्डलाक्रमणयोगेन । अप्रमेयतथागतबोधिसत्त्वभूमिसंवसनयोगेन । अप्रमेयतथागतबोधिसत्त्वभूमिपरिशोधनयोगेन । अप्रमेयतथागतज्ञानसागरविचारणयोगेन । अप्रमेयतथागतज्ञानावभासप्रतिलाभयोगेन । अप्रमेयतथागतबोधिसत्त्वभूताशेष-

वेगानभिनिर्हरामि । सर्वसमाधिसमुद्र

यः स्थापिताः सर्वजगदुपजीव्याः सुप्रतिविरहिताः सर्वकोशकोष्ठागाराणि विवृतानि महारत्ननिधाननिचया निदर्शिता अनेकनानाविधरत्नराशयः स्थापिता अन्नपानवस्त्रयानपुष्पमाल्यगन्धविलेपनचूर्णनानागन्धवर्णचीवररत्नकोशा विवृताः शयनासनवसनभवनविमानगृहाण्यलंकृतानि सर्वधनकनकसमृद्धानि ज्योतिध्वजमणिराजविन्यासविधूतान्धकाराणि स तेषां सत्त्वानां यथाभिलषितसर्वाभिप्रायपरिपूरणार्थं तेषु गृहेषु प्रत्येकमात्मभावसदृशमुपादाय कायमभिनिर्माय स्थापयामास। सर्वसत्त्वसर्वव्याधिप्रशमनाय च वैद्यभैषज्योपस्थायकांविविधजीवितोपकरणप्रत्ययसंपदमुपस्थापयामास। यथार्हविविधोपकरणपूर्णानि च नानारत्नविचित्रभाजनान्युपस्थापयामास। यदुत वज्रमणिभाजनानि नानागन्धमणिरत्नपरिपूर्णानि नानागन्धरत्नभाजनानि विविधोदारविचित्रवर्णरङ्गवस्त्रपरिपूर्णानि यानयुग्मानि सुबहूनि नानाकारसंस्थानानि विचित्ररत्नप्रतिमण्डितान्याजानेयाश्वगजगोयुक्तानि विविधांश्च रथान् राजार्हान्सर्वरत्नाभरणपरिभोगांश्च सर्वासनविधींश्च नानारत्नविचित्रान् विविधवितानविततान् रत्नकिङ्किणीजालावनद्धानुच्छ्रितच्छत्रध्वजपताकोपशोभितान् सर्वजनपदप्रदेशेषु स्थापयामास। ग्रामनगरनिगमजनपदप्रदानानि चोद्घोषयामास। नानाविधोद्यानरम्यारामतपोवनपरिभोगानपि सर्वगृहकलत्रपुत्रदारकपरित्यागानपि अनर्घ्यसर्वरत्नपरित्यागानपि स्वहृदयमज्जान्त्रगुणवृक्कमेदमांसरुधिरच्छविचर्मकरचरणबाहुकर्णनासानयनजिह्वादन्तोष्ठशीर्षपरित्यागानपि यावत्सर्वबाह्याध्यात्मिकसर्वाकारपरित्यागानप्युद्घोषयामास॥

स तमेवंरूपमुपकरणपरित्यागविधिं प्रत्युपस्थाप्य महायज्ञवाटं कारयामास यस्तस्या रत्नतालव्यूहमेधप्रदीपाया राजधान्याः पूर्वेण मणिशिखरतेजोनाम्ना नगरद्वारस्य पुरतः समविपुलायामः परमविस्तीर्णधरणीतलप्रवेशो निम्नोन्नतविशुद्धसमतलापगतश्वभ्रप्रपातः सर्वस्थानुकण्ठकापगत उत्सन्नशर्कराकठल्लः सर्वरत्नधातुसंचयः सर्वरत्नमयमणिरत्नराजसंस्तीर्णतलः अनेकमणिरत्न-

म्यक्संबोधौ कियच्चिरेण वा त्वमनुत्तरां सम्यक्संबोधिमभिसंभोत्स्यसे ॥

एवमुक्ते सर्वजगद्रक्षाप्रणिधानवीर्यप्रभा रात्रिदेवता सुधनं श्रेष्ठिदारकमेतदवोचत् ॥ सर्वसत्त्वपरिपाकसंचोदनकुशलसंभवो नाम कुलपुत्रायं विमोक्षः ॥ अहं कुलपुत्रानेन विमोक्षेण समन्वागता सर्वधर्मस्वभावसमतामनुबुध्य सर्वधर्मप्रकृतिमवतीर्यानालयं धर्मं निश्रित्य सर्वलोकोच्चलिता सुविभक्तरूपतां धर्माणामवतीर्याविसभागवर्णा । अवैवर्तवर्णा । अविकल्पवर्णा । अनीलवर्णा । अपीतवर्णा । अलोहितवर्णा । अनवदातवर्णा धर्मतावतीर्यानेकवर्णविभक्तिरूपात्मभावा नानात्ववर्णा ।^ अनेकवर्णा । अप्रमेयवर्णा विशुद्धवर्णा सर्वव्यूहप्रमुञ्चनवर्णा समन्तदर्शनवर्णा सर्वजगत्सदृशवर्णा सर्वलोकाभिमुखातिरेकवर्णा समन्तावभासप्रतिभासवर्णा अप्रतिकूलदर्शनवर्णा लक्षणानुव्यञ्जनसुविशोधितवर्णा अनवद्यचरणप्रभासवर्णा महाबलविक्रमसंदर्शनवर्णा दूरासदगम्भीरवर्णा सर्वलोकपर्यादत्तवर्णा सर्वजगद्वचनाक्षीणवर्णा क्षणक्षणविचित्रवर्णा नानावर्णमेघसंदर्शनवर्णा नानारूपसंस्थानवर्णा अप्रमेयविकुर्वितसंदर्शनवर्णा सुरुचितवचनवर्णा सर्वसुरूपचित्तवर्णा सर्वसत्त्वपरिमाकानुकूलवर्णा यथाशयवैनेयाभिमुखापनीतकुशलवर्णा अप्रतिहतसमन्तप्रभासवर्णा अच्छानाविलविप्रसन्नप्रभास्वरवर्णा । अभेद्यकायोपचयोपशोभितवर्णा अचिन्त्यधर्मनयप्रभावनवर्णा । अभिभूरनभिभूतसर्वाभिभवनवर्णा अतमस्तिमिरवर्णा सर्वान्धकारविधमनवर्णा सर्वशुक्लसुसमार्जितवर्णा महात्मगुणसमुद्रवर्णा पूर्वगुरुगौरवसुसमार्जितवर्णा अध्याशयगगनपरिशुद्धिवरप्रवरोत्तमविशालवर्णा अनाच्छेद्याक्षयगुणसमुद्रप्रभावनवर्णा सर्वलोकाभिनिश्रितासंभेद्यवर्णा असङ्गसर्वदिक्स्फरणवर्णा अनभिलाप्यक्षेत्रसमुद्रचित्तक्षणप्रसरानेकविविधवर्णसमुद्रसंदर्शनवर्णा सर्वसत्त्वमहाप्रीतिवेगविवर्धनवर्णा सर्वसत्त्वसागरसंग्रहवर्णा सर्वरोमविवराशेषबुद्धगुणसमुद्रमेघनिगर्जनवर्णा सर्वसत्त्वाशयाधिमुक्तिसागरविशोधितवर्णा सर्वधर्मार्थविनिश्चयसंदर्शनवर्णा नानावर्णरश्मिजालावभासवर्णा गगनप्रमाणविमलप्रभाव=

अविसभागा अनानात्वा अवैमात्र्या अविकल्पा अनीला अपीता अलोहिता अनवदातवर्णा

परायणभूता भवन्ति अन्तपरमशीतिभावोपनयनतया तीर्थभूता भवन्ति सर्वबुद्धसमुद्रावतरणतया संग्राहकभूता भवन्ति धर्मरत्नद्वीपोपनयनतया पुष्पभूता भवन्ति सर्वबुद्धगुणसंपुष्पितचित्ततया अलंकारभूता भवन्ति विपुलपुण्यज्ञानप्रभाप्रमुञ्चनतया परमप्रीतिकरा भवन्ति समन्तप्रासादिकतया अभिगमनीया भवन्ति अनवद्यकर्मप्रतिपत्त्या समन्तभद्रा भवन्ति^अप्रतिकूलदर्शनतया अवभासकरा भवन्ति ज्ञानरश्मिप्रमुञ्चनतया आलोककरा भवन्ति धर्मप्रदीपधारणतया प्रद्योतकरा भवन्ति बोध्याशयपरिशोधनतया सेनापतिभूता भवन्ति मारकर्मविनिवर्तनतया सूर्यभूता भवन्ति प्रज्ञारश्मिजालप्रमुञ्चनतया चन्द्रभूता भवन्ति गगनचन्द्रोदागमनतया मेघभूता भवन्ति सर्वजगन्महाधर्ममेघाभिप्रवर्षणतया ॥ एवं खलु देवते प्रतिपद्यमाना बोधिसत्त्वाः प्रिया भवन्ति सर्वसत्त्वानाम् ॥

अथ खल्वशोकश्रीर्बोधिसत्त्वसंगीतिप्रासाददेवता सार्धं तैर्दशभिः गृहदेवतासहस्रैः सुधनश्रेष्ठिदारकं दिव्यसमतिक्रान्तैः मनोमयैः पुष्पमाल्यगन्धचूर्णविलेपनरत्नाभरणावर्षैः प्रवृष्य्यानुपरिवार्य बोधिसत्त्वभवनं प्रविशन्तमाभिर्गाथाभिरभ्यष्टावीत् ॥

उत्पद्यन्ते जिना लोके कदाचि ज्ञानभास्कराः ।
संबोधौ चित्तमुत्पाद्य सर्वसत्त्वानुकम्पया ॥१॥
बहुभिः कल्पनयुतैः दुर्लभन्त च दर्शनम् ।
अविद्यान्धस्य लोकस्य ज्ञानसूर्यो महानसि ॥२॥
दृष्ट्वा लोकं विपर्यस्तमज्ञानतिमिरावृतम् ।
महाकृपां संजनय्य प्रस्थितो ऽसि स्वयंभुताम् ॥३॥
विशुद्धेनाशयेन त्वं बुध्यबोध्यार्थमुद्यतः ।
कल्याणमित्र भजसे ऽनपेक्षः कायजीविते ॥४॥
न निश्रयस्ते लोके ऽस्मिन्न निकेतो न संस्तवः ।
अनालयो ऽस्यसंकीर्णो निःसङ्ग गगनाशयः ॥५॥
बोधिचर्यां चरस्यग्रां पुण्यमण्डल सुप्रभः ।

सर्वाकाराङ्गसुपरिपूर्णकायतया असेचनकरूपा भवन्ति

एष हि कुलपुत्राः सत्पुरुषः सत्त्वानां चतुरोघोत्तरणतायै महादानं महाधर्मनावं समुदानेतुकामो दृष्टिपङ्कनिमग्नानां महाधर्मसेतुं स्थापयितुकामो महान्धकारप्राप्तानां ज्ञानालोकं कर्तुकामः संसारकान्तारप्रनष्टानां आर्यमार्गं संदर्शयितुकामः महाक्लेशव्याधिप्रपीडितानां धर्मभैषज्यं प्रदातुकामो जातिजरामरणोपंकतानाममृतधातुं दातुकामः त्रिविधाग्निसंप्रदीप्तानां शमथसलिलेन प्रह्लादयितुकामः शोकपरिदेवदुःखदौर्मनस्योपायासानां संतप्तानां महाश्वासं दातुकामो भवचारकावबद्धानां ज्ञानप्रहाणं दातुकामो दृष्टिबन्धनबद्धानां प्रज्ञाशस्त्रमुपसंहर्तुकामः त्रैधातुकनगरावरुद्धानां मोक्षद्वारं दर्शयितुकामः अक्षेमदिगभिमुखानां क्षेमां दिशमुपदर्शयितुकामः क्लेशसंस्कारोपद्रुतानां महाश्वासं दातुकामो दुर्गतिप्रपातभयभीतानां हस्तालम्बं दातुकामः स्कन्धप्रघातितानां निर्वाणनगरमुपदर्शयितुकामो धातूरगपरिवृतानां निःशरणमाख्यातुकामः आयतनशून्यग्रामसंनिश्रितानां प्रज्ञालोकेन निष्काशयितुकामः कुतीर्थप्रतिपन्नान्सम्यक्तीर्थमवतारयितुकामः अमित्रहस्तगतानां भूतकल्याणमित्रादर्शयितुकामो बालधर्मगोचराभिरतानामाचार्यधर्मेषु प्रतिष्ठापयितुकामः संसारपुराभिरतानुच्चाल्य सर्वज्ञतापुरं प्रवेशयितुकामः ॥

स एष कुलपुत्राः सत्पुरुष एवं सत्त्वपरित्राणायाप्रतिप्रश्रब्धो बोधिचित्तोत्पादविशुद्धिपरिमार्गमाणो ऽयमपरिखिन्नो महायानसमुदानयनाय अपरितृप्तः सर्वधर्ममेघयानैः नित्योद्युक्तः सर्वसंभारपरिपूरणायानिक्षिप्तधुरः सर्वधर्ममुखपर्यवदापनाय असंश्रितवीर्यः सर्वबोधिसत्त्वचरणतायै अनिवर्तप्रयोगः सर्वप्रणिधानाभिनिर्हाराय अवितृप्तः सर्वकल्याणमित्रदर्शनेन अक्लान्तकायः सर्वकल्याणमित्रपर्युपासनेन प्रदक्षिणग्राही सर्वकल्याणमित्रावववादानुशासनीषु ॥

दुर्लभाः कुलपुत्रास्ते सत्त्वाः सर्वलोके ये ऽनुत्तरायां सम्यक्संबोधिमभिसंप्रस्थिताः । ईदृशेन वीर्यारम्भप्रयोगेन बुद्धधर्मान्समुदानयन्ति ईदृश्या तीव्रप्रच्छन्दिकतया बोधिसत्त्वमार्गं पर्येषन्ते । ईदृश्यार्थि=

बोधौ प्रणिदधन्ति । अतस्ते दुर्लभतरा सत्त्वा ये ऽनुत्तरां सम्यक्सं

ञ्जुश्रीर्बोधिसत्त्वः प्रथमं कल्याणमित्रम् ॥१॥ ततो ऽनन्तरं मेघश्रीर्भिक्षुः ॥२॥ सागरमेघो भिक्षुः ॥३॥ सुप्रतिष्ठो भिक्षुः ॥४॥ मेघो द्रमिडः ॥५॥ विमुक्तकः श्रेष्ठी ॥६॥ सागरध्वजो भिक्षुः ॥७॥ आशोपासिका ॥८॥ भीष्मोत्तरनिर्घोष ऋषिः ॥९॥ जयोष्मायतनो ब्राह्मणः ॥१०॥ मैत्रायणी कन्या ॥११॥ सुदर्शनो भिक्षुः ॥१२॥ इन्द्रियेश्वरो दारकः ॥१३॥ प्रभूतोपासिका ॥१४॥ विद्वान् गृहपतिः ॥१९॥ रत्नचूडो धर्मश्रेष्ठी ॥१६॥^अनलो राजा ॥१८॥ महाप्रभो राजा ॥१८॥ अचलोपासिका ॥२०॥ सर्वगामी परिव्राजकः ॥२१॥ उत्पलभूतिर्गान्धिकः ॥२२॥ वैरो दासः ॥२३॥ जयोत्तमः श्रेष्ठी ॥२४॥ सिंहविजृम्भिता भिक्षुणी ॥२५॥ वसुमित्रा भागवती ॥२६॥ वेष्ठिलो गृहपतिः ॥२७॥ अवलोकितेश्वरो बोधिसत्त्वः ॥२८॥ अनन्यगामी बोधिसत्त्वः ॥२९॥ महादेवो देवपुत्रः ॥३०॥ स्थावरो पृथिवीदेवता ॥३१॥ वासन्ती रात्रिदेवता ॥३२॥ समन्तगम्भीरश्रीविमलप्रभा रात्रिदेवता ॥३३॥ प्रमुदितनयनजगद्विरोचना रात्रिदेवता ॥३४॥ समन्तसत्त्वत्राणोजःश्री रात्रिदेवता ॥३५॥ प्रशान्तसागरवती रात्रिदेवता ॥३६॥ सर्वनगररक्षासंभवतेजःश्री रात्रिदेवता ॥३७॥ सर्ववृक्षप्रफुल्लनसुखसंवासा रात्रिदेवता ॥३८॥ सर्वजगद्रक्षा-प्रणिधानवीर्यप्रभा रात्रिदेवता ॥३९॥ सुतेजोमण्डलरतिश्री लुम्बिनी-वनदेवता ॥४०॥ गोपा शाक्यकन्या ॥४१॥ माया देवी ॥४२॥ सुरेन्द्राभा देवकन्या ॥४३॥ विश्वामित्रो दारकाचार्यः ॥४४॥ शिल्पाभिज्ञश्च श्रेष्ठिदारकः ॥४५॥ भद्रोत्तमोपासिका ॥४६॥ मुक्तासारो हैरण्यकः ॥४७॥ सुचन्द्रो गृहपतिः ॥४८॥ अजितसेनो गृहपतिः ॥४९॥ शिवराग्रो ब्राह्मणः ॥५०॥ श्रीसंभवो दारकः श्रीमती च दारिका ॥५१॥ आर्यमैत्रेयो बोधिसत्त्वः ॥५२॥ आर्यसमन्तभद्रो बोधिसत्त्व इति ॥५३॥ पूर्वाधिकारावरोपितकुशलमूलशुक्लबीजे वीर्यारम्भोपार्जिताङ्कुरोद्गमे षट्पारमिताविटपशाखे चतुरशीत्युपायसहस्रविरूढमूले अनवद्याङ्गगद्यगाथाधर्मध्वनिदले सत्त्वपरिपाककुसुमस्तवके

॥ समन्तनेत्रः ॥ १७ ॥

creative commons

## Attribution-NonCommercial-ShareAlike 3.0 Unported

### You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

### Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

### With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer